सेतुकार्यक्रमः

# संस्कृतम्

कक्षा – अष्टमी




षड्सप्ताहात्मकः



षड्सप्ताहात्मकः

## सेतुकार्यक्रमः

# संस्कृतम्

कक्षा – अष्टमी

**सेतुकार्यक्रमः**
कक्षा – अष्टमी, संस्कृतम्

***प्रथम संस्करण***
*मार्च 2025 चैत्र 1947*

**सर्वाधिकार सुरक्षित**

- प्रकाशक की पूर्व अनुमति के बिना इस प्रकाशन के किसी भी भाग को छापना तथा इलैक्ट्रॉनिकी, मशीनी, फ़ोटो प्रतिलिपि, रिकॉर्डिंग अथवा किसी अन्य विधि से पुन: प्रयोग पद्धति द्वारा उसका संग्रहण अथवा प्रचारण वर्जित है।
- इस पुस्तक की बिक्री इस शर्त के साथ की गई है कि प्रकाशन की पूर्व अनुमति के बिना यह पुस्तक अपने मूल आवरण अथवा जिल्द के अलावा किसी अन्य प्रकार से व्यापार द्वारा उधारी पर, पुनर्विक्रय या किराए पर न दी जाएगी, न बेची जाएगी।
- इस प्रकाशन का सही मूल्य इस पृष्ठ पर मुद्रित है। रबड़ की मुहर अथवा चिपकाई गई पर्ची (स्टिकर) या किसी अन्य विधि द्वारा अंकित कोई भी संशोधित मूल्य गलत है तथा मान्य नहीं होगा।

***© राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्, 2025***

**एन. सी. ई. आर. टी. के प्रकाशन प्रभाग के कार्यालय**

एन.सी.ई.आर.टी. कैंपस
श्री अरविंद मार्ग
**नई दिल्ली 110 016** फ़ोन : 011-26562708

108, 100 फ़ीट रोड
हेली एक्सटेंशन, होस्डेकेरे
बनाशंकरी III इस्टेज
**बेंगलुरु 560 085** फ़ोन : 080-26725740

नवजीवन ट्रस्ट भवन
डाकघर नवजीवन
**अहमदाबाद 380 014** फ़ोन : 079-27541446

सी.डब्ल्यू.सी. कैंपस
निकट धनकल बस स्टॉप पिनहटी
**कोलकाता 700 114** फ़ोन : 033-25530454

सी.डब्ल्यू.सी. कॉम्प्लैक्स
मालीगाँव
**गुवाहाटी 781021** फ़ोन : 0361-2676869

**प्रकाशन सहयोग**

| | | |
|---|---|---|
| अध्यक्ष, प्रकाशन प्रभाग | : | *एम.वी.श्रीनिवासन* |
| मुख्य संपादक | : | *बिज्ञान सुतार* |
| मुख्य उत्पादन अधिकारी (प्रभारी) | : | *जहान लाल* |
| मुख्य व्यापार प्रबंधक | : | *अमिताभ कुमार* |

***आवरण***
*फातमा नासिर*

# निदेशकस्य निवेदनम्

प्रियच्छात्रा: शिक्षकाश्च!

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षणपरिषद् अष्टमकक्षायां प्रविष्टानां सर्वेषां छात्राणां हार्दिकं स्वागतं करोति। एषा कक्षा मध्यचरणस्य अन्तिमा कक्षा एवञ्च एकं महत्त्वपूर्णस्य परिवर्तनस्य प्रतीकम् अस्ति। यतो हि वयं राष्ट्रीयशिक्षानीतिः (एन.ई.पी. 2020) एवं च विद्यालयीयशिक्षायै राष्ट्रीय-पाठ्यचर्या-रूपरेखा (एन.सी.एस.-एस.ई. 2023) इत्यनयोः परिवर्तमानैः दृष्टिकोणैः सह स्वशैक्षिकपरम्परां सुसङ्गतां कुर्मः।

आनन्दमयम्, नवोन्मेषपूर्णं च भारतीयसंस्कृतिसंप्रयुक्तं शिक्षणानुभवं प्रदातुमस्माकं प्रतिबद्धता अस्ति। नूतनं पाठ्यक्रमं शिक्षण-प्रशिक्षण-सामग्री च अनुभवात्मके, अन्वेषणाधिष्ठिते, जिज्ञासाप्रेरिते च शिक्षायै निर्मिते स्तः याभ्यां शिक्षा वास्तविकतया समृद्धिकारिणी यात्रा भवति। वस्तुतस्तु वयं जानीमः यत् अस्माकं छात्रः पुरातनपाठ्यक्रमात् नूतपाठ्यक्रमाय संक्रमणं करोति यत् अनेन नावीन्यपूर्णेन दृष्टिकोणेन भिन्नमस्ति। एतद्भेदनिवारणाय एवं च एकं सहजं प्रभावपूर्णं संक्रमणं सुनिश्चितं कर्तुं, वयं शारीरिकशिक्षा-स्वस्थतया सह सर्वेषु विषयेषु क्षेत्रेषु च एकं व्यापकं षट्सप्ताहात्मकं सेतुकार्यक्रमं (ब्रिज-प्रोग्राम) विकसितवन्तः। एषः सेतुकार्यक्रमः छात्रेभ्यः अष्टमकक्षायां अभिनव-शैक्षिणिकदृष्टिकोणयुक्त-सामग्रीभ्यः सिद्धतां प्रकल्पयति। एषः (सेतुकार्यक्रमः) शिक्षकेभ्यः अभिनवं शैक्षिकं दृष्टिकोणं तथा च छात्रेभ्यः अकर्षकान् कार्यकलापान प्रददाति, येन तस्य समग्रः विकासः सुनिश्चितः भवेत्। यतो हि अष्टमकक्षा-माध्यमिकचरणाय सेतुरूपेण कार्यं करोति, एषः भाविशिक्षायै सुष्ठु आधारस्थायनाय महत्त्वपूर्णः अस्ति। अस्य सेतुपाठ्यक्रमस्य साफल्येन समाप्त्यनन्तरं छात्रः नवीनपाठ्यपुस्तकानाम् अन्यशिक्षणसामग्रीणां च सर्वतोभावेन उपभोगसमर्थैश्च कृत्वा तेभ्यः सर्वविधलाभप्राप्तये सम्यग्रूपेण सुसज्जितः भविष्यति। अहं सर्वैः शिक्षकेभ्यः सादरं विनिवेदयामि यत् ते एन.ई.पी. 2020 इत्यस्य मूलभावनां आत्मसात्कुर्युः एवं च अस्याः संस्कृतौ निहितम् अनुभवात्मकं शिक्षणम् अग्रेसारयन्तु यत् 'वसुधैव कुटुम्बकम्' इति भावनया सह प्रतिध्वनितं भवति। एतद् अस्माकं यात्रायाः प्रथमं सोपानम् अस्ति एवं च सहयोगस्य सामूहिककार्यस्य च शक्तिः प्रत्येकं छात्राय गुणवत्तापूर्णशिक्षां प्रापयितुं प्रभावपूर्णा अस्ति इति वयं मिलित्वा सम्पूर्णं शिक्षापरिवारम् एतद् प्रदर्शयितुं शक्नुमः। आगम्यताम् ! वयं समर्पणेन सोत्साहं च अस्यां यात्रायाम् अग्रेसरामः, एतत् सुनिश्चितं च कुर्मः यत् प्रत्येकं छात्रः अधिगमानन्दस्य अनुभूतिं कुर्यात् एवं च सम्पूर्णां क्षमतां प्राप्नुयात्।

दिनेशप्रसादः सकलानी

*निदेशकः*

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्,

नव-देहली

# निर्माणसमूहः

## परामर्शः एवं मार्गदर्शनम्

दिनेश प्रसादः सकलानी, *निदेशक*, रा.शै.अ.प्र.प., नवदेहली

मञ्जुल भार्गवः, *उपाध्यक्ष*, राष्ट्रिय पाठ्यक्रम एवं शिक्षण-अधिगम सामग्री समिति (एन.एस.टी.सी.)

अनुराग बेहरः, *सदस्य*, राष्ट्रिय पाठ्यक्रम रूपरेखा निरीक्षण समिति (एन.ओ.सी.)

गजानन लोण्ढे, *प्रमुख*, कार्यक्रम कार्यालय, राष्ट्रिय पाठ्यक्रम एवं शिक्षण-अधिगम सामग्री समिति (एन.एस.टी.सी.)

रञ्जना अरोड़ाः, *आचार्या एवं अध्यक्ष*, पाठ्यचर्या अध्ययन एवं विकास विभाग, रा.शै.अ.प्र.प., नवदेहली

## सदस्याः

अशोककुमारः, *टी.जी.टी.-संस्कृतम्*, एम.एल.खन्ना डी.ए.वी. पब्लिकविद्यालयः, द्वारका, नवदेहली

अजयकुमारः, प्रवक्ता-संस्कृतम्, मुसद्दीलाल-रा.उ.मा. बालविद्यालयः, नरेला, नवदेहली

उपेन्द्रकुमारमिश्रः, टी.जी.टी.-संस्कृतम्, अमृता विद्यालयम्, पुष्पविहारम्, नवदेहली

देवकीनन्दनः, *सहायकाचार्यः*, भाषाशिक्षाविभागः, रा.शै.अ.प्र.प., नवदेहली

यासमीन अशरफ, *सहायकाचार्या*, भाषाशिक्षाविभागः, क्षेत्रियशैक्षिकसंस्थानम्, अजमेर, राजस्थानम्

वाचस्पतिनाथझा 'मणिः', *सहायकाचार्यः*, भाषाशिक्षाविभागः, रा.शै.अ.प्र.प., नवदेहली

सिद्धार्थभार्गवः, *मुख्यपरामर्शदाता-संस्कृतम्*, परियोजनाकार्यालयः, रा.शै.अ.प्र.प., नवदेहली

सुमितकुमारशर्मा, *टी.जी.टी.-संस्कृतम्*, राजकीय-सर्वोदयविद्यालयः, अम्बेडकरनगरम्, दक्षिणपुरी, नवदेहली

जतीन्द्रमोहनमिश्रः, *आचार्यः*, भाषाशिक्षाविभागः, रा.शै.अ.प्र.प., नवदेहली **(सदस्य-समन्वयकः)**

# कार्तज्ञ्यम्

राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षण-परिषद् (रा.शै.अ.प्र.प.) अस्य सेतुकार्यक्रमस्य विकासे विजयन के. आचार्य डी.सी.एस.डी., रा.शै.अ.प्र.प., बिनय पटनायक, मुख्य परामर्शकः, कार्यक्रम कार्यालय एन.एस.टी.सी. एवं शालू तिवारी, सहायकाचार्या, डी.सी.एस.डी., रा.शै.अ.प्र.प., इति एतेषां निरन्तरसमर्थन कारणात् तेभ्यः भूरिशः धन्यवादान् ज्ञापयति।

अस्मिन् पुस्तके भाषा शिक्षाविभागाध्यक्षः मोहम्मद फारूक अंसारी महाशयेभ्यः भूरिशः धन्यवादान् समर्पयामः।

अन्ये अस्याः सेतुचर्यायाः संरचनायां निर्माणे च सहयोगिनः नवदेहलीस्थ रा.शै.अ.प्र.प., इति संस्थायाः भाषाशिक्षाविभागस्य बालमुकुन्दः, *वरिष्ठशोधाध्येता*, गोविन्ददासः, *कनिष्ठपरियोजनाध्येता*, देवेशशर्मा, *कनिष्ठपरियोजनाध्येता*, विशालत्यागी, *कनिष्ठपरियोजनाध्येता*, निमेशसिंहः, *कनिष्ठपरियोजनाध्येता*, प्रज्ञा आर्या, *कनिष्ठपरियोजनाध्येता* तथा च यशवन्तः श्रीवास्तवः, *डी.टी.पी. कार्यञ्च* इत्येते सर्वेऽपि साधुवादार्हाः सन्ति।

रा.शै.अ.प्र.प., अस्य सेतु-सामग्रीम् अन्तिमं रूपं प्रदातुं प्रकाशन-प्रभागं प्रति कृतज्ञतां ज्ञापयामः। सेतु-सामग्रीं संपादने अतुल मिश्रा, *संपादकं* (*संविदा*); अतुल गुप्ता, *सहायकसंपादकं* (*संविदा*); विभूति नारायण ओझा, *प्रूफरीडर* (*संविदा*) प्रति तथा च प्रकाशनविभागे *डी.टी.पी. प्रकोष्ठस्य प्रभारिणं* सुरेंद्र-कुमार, मोहन सिंह *डी.टी.पी.-संचालकान्* (*संविदा*) प्रति धन्यवादं प्रकटयामः।

# विषयानुक्रमणिका

*निदेशकस्य निवेदनम्* *iii*
भूमिका 1
अध्यापकेभ्यः निर्देशाः 1
छात्रेभ्यः निर्देशाः 2
पाठ्यचर्योद्देश्यानि 3

**प्रथमसप्ताहः**

1. उच्चारणस्थानानि 5
2. सर्वनामपदाभ्यासः 6
3. शब्दरूपाणाम् अभ्यासः 1 (पुनरावृत्तिः) 8
4. शब्दरूपाणाम् अभ्यासः 2 (पुनरावृत्तिः) 10

*साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च –1* *11*

**द्वितीयसप्ताहः**

5. शब्दरूपाणि 11
6. धातुरूपाणि 1 13
7. धातुरूपाणि 2 16
8. अव्ययानि (स्थानबोधकानि) 18

*साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च –2* *19*

**तृतीयसप्ताहः**

9. कारकाभ्यासः 1 26
10. कारकाभ्यासः 2 28
11. उपपदविभक्ति-अभ्यासः 1 (द्वितीया-चतुर्थीविभक्तिः) 30
12. उपपदविभक्ति-अभ्यासः 2 (पञ्चमी-सप्तमीविभक्तिः) 32

*साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च –3* *34*

## चतुर्थसप्ताहः


| | | |
|---|---|---|
| 13. | सन्धयः | 39 |
| 14. | अव्ययानि (प्रश्नवाचकानि) | 41 |
| 15. | उपसर्गाभ्यासः 1 | 43 |
| 16. | उपसर्गाभ्यासः 2 | 45 |
| | *साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च –4* | *46* |


## पञ्चमसप्ताहः


| | | |
|---|---|---|
| 17. | प्रत्ययः (कृत्-प्रत्ययः) | 51 |
| 18. | प्रत्ययः (तद्धित्-प्रत्ययः) | 55 |
| 19. | प्रत्ययः (स्त्री-प्रत्ययः) | 57 |
| 20. | सङ्ख्यापदानाम् अभ्यासः | 60 |
| | *साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च –5* | *61* |


## षष्ठसप्ताहः


| | | |
|---|---|---|
| 21. | समयः | 65 |
| 22. | विशेषण-विशेष्यम् | 66 |
| 23. | समासः 1 | 68 |
| 24. | समासः 2 | 70 |
| 25. | लघुकथायां रिक्तस्थापूर्तिः | 72 |
| | *साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च –6* | *74* |

# भूमिका

श्रवणं भाषणं पठनं लेखनं च इत्येतेषां चतुर्णां भाषायाः कौशलानां सहजविकासः सर्वेषां भाषाविदाम् उद्देश्यं भवति। परं छात्राः वर्णानां पदानां वाक्यानां च सहयोगेन सहजतया भाषाम् अधिगन्तुं व्यवहर्तुं च समर्थाः भवेयुः इति भाषाशिक्षणस्य उद्देश्यं सर्वैः परिगण्यते। अतः छात्राः बहुभाषिकतायाः संरक्षणपुरस्सरं राष्ट्रियशिक्षानीतिः (एन.ई.पी.) 2020 इत्यत्र संस्कृतभाषायै प्रदत्ततां संस्तुतीनाम् उद्देश्यं कथं परिपूरयेयुः इति धिया अस्य सेतुकार्यक्रमस्य प्रकाशनं पूर्वपठितांशान् परिलक्ष्य नूतनांशान् ज्ञातुं छात्रेभ्य: प्रेरकं भविष्यति।

छात्रान् प्रति न्यूनतमान् अधिगमान् प्रापयितुम् अस्मिन् सेतुकार्यक्रमे कतिचन कार्यकलापा: प्रदीयन्ते। ते च कार्यकलापा: उदाहरणरूपेण प्रस्तूयन्ते। तेषु गतिविधिषु अधिगमोद्देश्यानि सामान्यरूपेण प्रदत्तानि सन्ति तानि परिपूरयितुं अध्यापकैः स्वव्यवस्थायाः उपलब्धोपसामग्र्याः च अनुगुणं प्रयत्नः विधेयः।

### कार्यकलापा:

अध्यापिका/अध्यापकः कक्षायां प्रथमसप्ताहे उच्चारणस्थानानाम्, सर्वनामपदानाम्, पूर्वकक्षायां पठितानां शब्दरूपाणाम् अभ्यासं कारयेत्। अनेन क्रमेण द्वितीयसप्ताहे नूतनानां शब्दरूपाणाम्, धातुरूपाणाम्, क्रियापदानाम्, स्थानबोधकानाम् अव्ययानाम् अभ्यासं चिन्तयेत्। तदनुगुणं तृतीयसप्ताहे कारकानाम्, उपपदविभक्तीनाम् अभ्यासं परिकल्पयेत्। पश्चात् च चतुर्थसप्ताहे सन्धीनाम्, प्रश्नवाचकानाम् अव्ययानाम्, उपसर्गाणाम् अभ्यासं साधयेत्। ततः पञ्चमसप्ताहे कृत्-तद्धित्-स्त्रीप्रत्ययानाम्, सङ्ख्यापदानाम् अभ्यासं समाचरन् षष्ठसप्ताहे समयस्य, विशेषण-विशेष्ययोः, समासानां च अभ्यासं स्वव्यवस्थानुगुणं सम्पादयेत्।

## अध्यापकेभ्यः निर्देशाः

सम्माननीयाः अध्यापक:/अध्यापिका: अस्य सेतुकार्यक्रमस्य संवाहकाः भवन्तः भवत्यश्च सर्वेऽपि धन्यवादार्हाः। अस्मिन् सेतुकार्यक्रमे निर्दिष्टाः क्रियाकलापाः सम्भावितरूपेण दीयन्ते येषां संवाहकाः भवन्तः सर्वेऽपि क्रियान्वयनाय सक्रियं दायित्वं निर्वोढयिष्यन्ति इति न केवलम् आशा अपितु परमो विश्वासोऽपि वर्तते।

अस्माभिः सर्वैः अपि नूनमेव अवगम्यते यत् भाषायाः अभ्यासः श्रवणभाषणपठनलेखनानि विना कदापि न सम्भवति। अतः अस्माभिः एतेषां चतुर्णाम् अपि अंशानाम् अभ्यासाय पूर्णः अवसरः छात्रेभ्यः परिकल्पनीयः।

## श्रवणाभ्यासः

- कक्षायां छात्राणां श्रवणाय अत्यन्तसामान्यानि प्रादेशिकभाषापरकानि लघुसंस्कृत-वाक्यानि व्यवहारे प्रयोक्तव्यानि।
- उदाहरणवाक्यानि कक्षाव्यवहारः संस्कृतभाषया एव स्यात्। येन संस्कृतस्य श्रवणं छात्राणां भवेत्।
- संस्कृतभाषया लघुकथा-संवाद-श्रावणं प्रदर्शनं च परिकल्पनीयम्।

## भाषणाभ्यासः

- कक्षायां छात्राणां सम्भाषणाय अवसरः कल्पनीयः।
- विवरणाय लघुविषयाः दातव्याः। यथा – व्यक्ति-स्थान-वस्त्वादिपरिचयः।

## पठनाभ्यासः

- कक्षायां छात्राणां पठनाय अवसरः कल्पनीयः।
- कथा-सूचना-वार्ता-पत्रिकादिपठनं चिन्तनीयम्।

## लेखनाभ्यासः

- कक्षायां छात्राणां पठनाय अवसरः कल्पनीयः।
- कथा-सूचना-वार्ता-पत्रिकादिपठनं चिन्तनीयम्।
- अनेन विधिना श्रवण-भाषण-पठन-लेखन-पुरस्सरं निर्दिष्टानां क्रियाकलापानां पूर्तये प्रयत्नः विधेयः।

## छात्रेभ्यः निर्देशाः

**1. सोत्साहभागग्रहणम्**

छात्राः सोत्साहं सर्वेषु कार्यकलापेषु उत्साहेन भागं गृह्णीयुः भाषायाः च अभ्यासं कुर्युः।

**2. कार्यकलापानां निष्ठया अनुकरणम्**

छात्राः रुचिपुरस्सरं सर्वान् कार्यकलापान् अनुकुर्वन्तः दैनन्दिनव्यवहारे लघुवाक्यानां प्रयोगं कुर्युः।

**3. प्रदत्तकार्यं समयेन करणीयम्**

छात्राः प्रत्येकं कार्यकलापं साधयितुं समयस्य अनुपालनं नूनमेव निश्चप्रचं कुर्युः।

**4. परियोजनाकार्यम्**

छात्राः प्रत्येकं परियोजनाकार्यं परिसमापयितुं सर्वदा सक्रियाः भवेयुः।

**5. यथासम्भवं संस्कृतव्यवहारः**

भाषायां प्रवाहम् आनेतुं छात्राः यथासम्भवं कक्षायां गृहे मार्गे आपणादिषु च सर्वत्र मित्रैः मातापितृभ्यां बन्धुभिः च सह संस्कृतेन सम्भाषणं कर्तुं प्रयत्नशीलाः भवेयुः। यदि सर्वत्र न सम्भवति तर्हि संस्कृतज्ञैः सह संस्कृतेन सम्भाषणं स्यादेव। तेन संस्कृतसम्भाषणे सामर्थ्यं सम्भविष्यति।

**6. शब्दरूपाणां धातुरूपाणां नित्यं वाचनम्**

छात्राः प्रतिदिनं नियमितरूपेण शब्दरूपाणां धातुरूपाणां च वाचनं कुर्युः।

**7. शब्दकोशानाम् अवलोकनम्**

छात्राः प्रतिदिनं नियमितरूपेण शब्दकोशस्य अवलोकनम् कुर्युः। तेन शब्दसम्पत् वर्धते भाषाव्यवहारे च सारल्यं भवति।

**8. कथापुस्तकानां पठनम्**

छात्राः नियमितरूपेण कथापुस्तकानि पठेयुः अवगन्तुं च प्रयत्नं कुर्युः।

## पाठ्यचर्योद्देश्यानि

**CG-1**
- घटनानां परिस्थितीनां च संस्कृतेन वर्णनेन दैनन्दिन-परस्पर-क्रियाणां सन्दर्भे प्रभावि-अन्तःक्रियात्मकस्य कौशलस्य विकासः।
- संस्कृतेन स्वविचारान् अभिव्यक्तुं मौखिकक्षमतायाः वर्धनम्।

**C-1.1**
- दैनिक-जीवने संस्कृतेन व्यवहारार्थं छात्राणां सम्भाषणात्मक-क्षमतायाः विकासः, विमर्शार्थं परिस्थितीनां च वर्णनार्थं संस्कृत-मौखिक-योग्यतायाः संवर्धनम्।
- छात्रः/छात्रा कक्ष्यायाम् अन्यैः उक्त-कथनानुसारं प्रत्युत्तरति वार्तालापं च अग्रे सारयति।

**C-1.2**
- छात्रः/छात्रा विभिन्न-संस्कृत-पाठ्य-सामग्रीः (यथा– कथाः, श्लोकाः, गीतानि, वार्तालापाः इत्यादयः) श्रुत्वा मुख्यभावं साररूपेण प्रस्तौति।
- पाठ्यसामग्र्याः अनावश्यकान् अंशान् परित्यज्य पाठ्यसामग्र्याः सारांशं सार्थकयुक्तिभिः लघुवाक्यैः च प्रस्तौति।

**C-1.3** छात्रः/छात्रा कक्ष्यागत-संवादानां, संक्षिप्त टिप्पणीनां, संक्षिप्तानां भाषणानां घटनानां वा मौखिकप्रस्तुतिं संस्कृतेन करोति।

**CG-2** संस्कृत-पठने प्रवाहशीलतायाः विकासः पठितांशं च अवगन्तुं क्षमतायाः विकासः।

**C-2.1** छात्रः समुचित-विराम चिह्न-युक्त-संस्कृत-कथाः लघु-संस्कृत-गद्यांशान् च प्रवाहपूर्वकं शुद्धतया पठितुं समर्थः भवति।

**C-2.2**
- कथानां कवितानां संवादानां भित्तिपत्राणां संसूचनानां च अर्थान् भावांश्च अवगच्छति।
- अपरिचितं पाठ्यांशं पठित्वा पूर्वज्ञानेन तस्य सम्बन्धं कल्पयित्वा मुख्यभावान् अवगन्तुं समर्थः भवति।

**CG-3** लेखने निर्देशने निमन्त्रणे पत्रेषु च स्वीय-अवगमनानि अनुभवान् भावनाः विचारांश्च अभिव्यञ्जयितुं सामर्थ्यं विकासयति।

**C-3.1**
- स्वावबोधनम् अनुभवांश्च अभिव्यक्तुम् अनुच्छेदं लिखति।
- उद्देश्यानुसारं दीर्घवाक्यानि उपयुज्य विचारान् अनुभवांश्च लिखति।
- व्याकरणदृष्ट्या च शुद्धतया कस्मिंश्चित् विषये कांश्चन अनुच्छेदान् लिखति।

प्रथमसप्ताहः

# 1 उच्चारणस्थानानि

## कार्यकलापस्य उद्देश्यम्

- अध्यापकः चित्रमाध्यमेन वर्णानाम् उच्चारणस्थानपरिचयं कारयिष्यति।
- छात्राः स्तम्भमेलनमाध्यमेन वर्णानाम् उच्चारणस्थानानि वर्णान् च मेलयिष्यन्ति।

## विषयावबोधः

- अध्यापकः पाठनाय उच्चारणस्थानस्य चित्रस्य कार्यकलापे प्रयोगं करिष्यति।
- अध्यापकः वर्णं दर्शयित्वा तस्य वर्णस्य समुचितम् उच्चारणं कृत्वा तस्य उच्चारणस्थानं वक्तुं प्रेरयति।

## क्रियान्वयनम्

- अध्यापकः उच्चारणस्थानानां मुद्रितपत्रं (प्रिण्ट-आउट) अथवा स्फोरकपत्रं (चार्टपत्रकं) कक्षायां प्रदर्शयेत्।
- अध्यापकः सर्वेषां वर्णानां लघु-लघुचिटिकाः निर्माय स्थापयेत्।
- ततः सः वर्णचिटिकाः छात्रेषु वितरेत्। सर्वे छात्राः स्व-स्ववर्णचिटिकां पठित्वा उच्चारणं कुर्युः।
- अध्यापकः कार्यकलापं समूहकार्यमाध्यमेन वैयक्तिकरूपेण वा सम्पादयितुं शक्नुयात्। छात्राः सक्रियरूपेण सहभागं कुर्युः।

वर्णानां षट् उच्चारण-स्थानानि




## आकलनप्रश्नः

**मेलनं करोतु —**

| उच्चारणस्थानम् | वर्णाः |
|---|---|
| कण्ठः | ऋ |
| तालु | न |
| मूर्धा | प |
| दन्ताः | इ |
| ओष्ठौ | ष |

# 2 सर्वनामपदाभ्यासः

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापमाध्यमेन छात्राः सर्वनामपदानां प्रयोगे निपुणाः भविष्यन्ति।
- अत्र सः/एषः/कः, सा/एषा/का, तत्/एतत्/किम् इत्येतेषां सर्वनामपदानाम् अभ्यासः भविष्यति।

## विषयावबोधः

- अध्यापकः उपर्युक्तसर्वनामपदानाम् अभ्यासाय शब्दरूपानुगुणं चिटिकानां निर्माणम् अधः प्रदर्शितचित्रानुसारं छात्राणां साहाय्येन कारयेत्।
- अधः प्रदर्शितचित्रानुसारं एकस्य बृहत् स्फोरकपत्रस्य उपरि कोशानां निर्माणं कारयेत्।

## क्रियान्वयनम्

- सर्वप्रथमं अध्यापकः कक्षायां यावन्तः छात्राः समुपस्थिताः सन्ति, तदनुगुणं समानसङ्ख्याकानां समूहानां निर्माणं कुर्यात्।
- कोशयुक्तं स्फोरकपत्रं कक्षायां श्यामपट्टे अवलम्ब्य शब्दरूपचिटिकाः च अग्रे उत्पीठिकायां स्थापयेत्।
- प्रत्येकं समूहात् एकः प्रतिभागी अग्रे आगच्छेत्, आगत्य उत्पीठिकातः एकां चिटिकां स्वीकृत्य समुचितकोशे स्थापयेत्।
- अनेन प्रकारेण द्वितीयसमूहात् एकः प्रतिभागी अग्रे आगच्छेत्, आगत्य उत्पीठिकातः एकां चिटिकां स्वीकृत्य समुचितकोशे स्थापयेत्।
- अनेन प्रकारेण क्रमः चलिष्यति। अन्ते स्थापितानां चिटिकानां निरीक्षणं कृत्वा त्रुटियुताः चिटिकाः छात्राणां साहाय्येन पुनः समुचितस्थाने स्थापयेत्।




शब्दरूपम्

| विभक्तिः वचनम् → ↓ | ↓ | ↓ | ↓ |
|---|---|---|---|
| प्रथमा | | | |
| द्वितीया | | | |
| तृतीया | | | |
| चतुर्थी | | | |
| पञ्चमी | | | |
| षष्ठी | | | |
| सप्तमी | | | |
| सम्बोधनम् | | | |
| आकलनम् | | | |

### आकलनप्रश्नः

**समुचितं पदं मञ्जूषातः स्वीकृत्य रिक्तस्थानानि पूरयत—**

ताः, तत्, सः, तौ, का, के, एतानि, ते, किम्

(क) ............................ वनं गतवान्।

(ख) ............................ गच्छति?

(ग) ............................ फलम्।

(घ) ............................वाहनानि।

(ङ) ............................ पठन्ति?

(च) ............................ लिखतः।

(छ) ............................ महिलाः।

(ज) ............................ पुष्पम्?

(झ) ............................ पिबतः।

# 3 शब्दरूपाणाम् अभ्यासः 1 (पुनरावृत्तिः)

## कार्यकलापस्य उद्देश्यम्

- अध्यापक: शब्दरूपाणां बोधं कारयिष्यति।
- अनेन कार्यकलापेन सर्वासां विभक्तीनां वचनानाञ्च अभ्यासो भविष्यति।

## विषयावबोधः

अध्यापक: पूर्वबोधितानां शब्दरूपाणां स्मारणं कारयित्वा कतिचन नूतन-शब्दरूपाणाम् अभ्यासं कारयेत्।

यथा – बालक, फल, बालिका, नदी, मुनि, मति, वारि, साधु, धेनु, वधू, पितृ, मातृ-इत्यादयः।

अध्यापकः एकस्मिन् स्फोरकपत्रके (चार्ट इत्यत्र) प्रदत्तचित्रानुसारं कोषनिर्माणं कारयेत् यत्र वामभागे प्रथमातः सम्बोधनपर्यन्तं उपरि च त्रीणि वचनानि लिखितानि भवेयुः। अध्यापकः विभिन्नानि शब्दरूपाणि अधिकृत्य चिटिकानां निर्माणं कारयेत्। चिटिकासु पदानि तथा लिखितानि भवेयुः यथा कोषे स्थापनानन्तरमपि स्पष्टानि भवेयुः।

## क्रियान्वयनम्

अध्यापकः स्फोरकपत्रकं (चार्टपत्रकं) कक्षायाम् अवलम्बयेत्। अभ्यस्तेषु कस्यापि एकस्य शब्दरूपस्य चिटिकाः उत्पीठिकायां मिश्रितरूपेण स्थापयेत्। अध्यापकः एकैकं कृत्वा छात्रान् आह्वयेत्। छात्रः कामपि चिटिकां स्वीकृत्य तस्याः उपरि लिखितं शब्दम् उच्चैः उच्चारयेत्, तां चिटिकां च स्फोरकपत्रके समुचिते कोषे स्थापयेत्। एवमेव अन्ये छात्राः अपि इमां प्रक्रियाम् अनुसरेयुः।

एषः कार्यकलाप: समूहानुसारम् अपि कारयितुं शक्यते। एकस्य शब्दरूपस्य चिटिकाः एकस्मै समूहाय दत्वा चार्टपत्रके समुचिते स्थाने स्थापयितुं अध्यापक: निर्दिशेत्।



## आकलनप्रश्नः

**उदाहरणानुसारं रिक्तस्थानानि पूरयत —**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | बालकः | बालकौ | बालकाः |
| | देवः | .................. | .................. |
| द्वितीया | फलम् | फले | फलानि |
| | .................. | .................. | पुष्पाणि |
| तृतीया | बालिकया | बालिकाभ्याम् | .................. |
| | .................. | .................. | महिलाभिः |
| चतुर्थी | मुनये | .................. | .................. |
| | .................. | कविभ्याम् | .................. |
| पञ्चमी | .................. | साधुभ्याम् | .................. |
| | रघोः | .................. | .................. |
| षष्ठी | .................. | .................. | धेनूनाम् |
| सप्तमी | .................. | नद्योः | .................. |
| | देव्याम् | .................. | .................. |
| सम्बोधनम् | हे पितः | .................. | .................. |
| | .................. | हे मातरौ | .................. |

# 4 शब्दरूपाणाम् अभ्यासः 2 (पुनरावृत्तिः)

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्रा: क्रीडामाध्यमेन शब्दरूपाणाम् अभ्यासं करिष्यन्ति।
- छात्रा: शब्दरूपाणां सामूहिकम् उच्चारणं करिष्यन्ति।

## विषयावबोधः

- अध्यापक: त्रयाणां वचनानां सर्वासां विभक्तीनां च स्फोरकपत्राणि छात्राणां साहाय्येन रचयेत्।
- अध्यापक: छात्राणां साहाय्येन पाठितानि शब्दरूपाणि अधिकृत्य चिटिकानां निर्माणं कुर्यात्।

## क्रियान्वयनम्

अध्यापकः त्रिभ्यः छात्रेभ्यः वचनानाम् अष्टभ्यः छात्रेभ्यः च विभक्तीनां स्फोरकपत्राणि प्रदाय कक्षे शब्दरूपस्य लेखन - क्रमानुसारं स्थातुं निर्दिशेत्। अध्यापक: एकस्य शब्दरूपस्य चिटिकाः छात्रेषु अव्यवस्थितरूपेण वितरेत्। इदानीं ते छात्राः एकैकं कृत्वा अग्रे आगत्य स्वचिटिकायां लिखितं शब्दम् उच्चारयेयुः सम्बद्धविभक्तौ समुचिते च वचने गत्वा तिष्ठेयुः। एवमेव सर्वे छात्राः कुर्वन्ति। अनन्तरं ते सर्वे मिलित्वा तस्य शब्दरूपस्य सामूहिकम् उच्चारणं कुर्वन्ति।

## आकलनम्

**निर्देशानुसारं विभक्तय: लिखत—**

| शब्द | विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| गणेश | चतुर्थी | गणेशाय | गणेशाभ्याम् | गणेशेभ्य: |
| नदी | द्वितीया | ........... | ............ | ........... |
| बालक | पञ्चमी | ........... | ............ | ........... |
| पुष्प | तृतीया | ........... | ............ | ........... |
| पितृ | प्रथमा | ........... | ............ | ........... |
| राधा | षष्ठी | ........... | ............ | ........... |
| गुरु | सप्तमी | ........... | ............ | ........... |

# साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च –1

**1. अधोलिखितेषु वर्णेषु समुचितवर्णं चित्वा सम्बन्धितोच्चारणस्थानस्य वर्तुले लिखत—**

अ च् ट् ग् थ् उ प् ह् ऋ छ् ढ् लृ ब् द् इ

| कण्ठः | तालु | मूर्धा | दन्तः | औष्ठौ |
|---|---|---|---|---|
| ....... ....... ....... | ....... ....... ....... | ....... ....... ....... | ....... ....... ....... | ....... ....... ....... |

**2. उचितं विकल्पं चिनुत—**

- ग् कण्ठः (कण्ठः/नासिका/दन्तः)
- र् ............... (मूर्धा/तालु/कण्ठः)
- श् ............... (दन्तः/औष्ठौ/तालु)
- भ् ............... (औष्ठौ/नासिका/मूर्धा)
- ल् ............... (मूर्धा/तालु/दन्तः)
- विसर्गः ............... (तालु/दन्तः/कण्ठः)

**3. समुचितं सुमेलयत—**

| वर्णः | उच्चारणस्थानम् |
|---|---|
| ञ् | मूर्धा |
| ध् | औष्ठौ |
| ख् | तालु |
| ष् | कण्ठः |
| ब् | दन्तः |

**4. मञ्जूषातः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत—**

तानि ताः कः तौ सा

- ………………… पुस्तकं पठति।
- ………………… पुष्पाणि सन्ति।
- ………………… पत्रं लिखतः।
- ………………… विद्यालयं गच्छन्ति।

**5. उदाहरणानुसारं रिक्तस्थानानि पूरयत—**

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते |
| | कः | …………… | …………… |
| द्वितीया | तम् | तौ | तान् |
| | …………… | …………… | …………… |
| तृतीया | तया | ताभ्याम् | ताभिः |
| | कया | …………… | …………… |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः |
| | कस्यै | …………… | …………… |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः |
| | कस्मात् | …………… | …………… |
| षष्ठी | तस्याः | तयोः | तासाम् |
| | कस्याः | …………… | …………… |
| सप्तमी | तस्मिन् | तयोः | तेषु |
| | कस्मिन् | …………… | …………… |

**6. समुचितेन पदेन सह योजयत—**

| | |
|---|---|
| • सप्तमीविभक्तिः बहुवचनम् | बालकः |
| • पञ्चमीविभक्तिः एकवचनम् | बालिकाभ्याम् |
| • प्रथमाविभक्तिः एकवचनम् | नद्याः |
| • चतुर्थीविभक्तिः एकवचनम् | मुनिषु |
| • सप्तमीविभक्तिः द्विवचनम् | वारिणाम् |
| • षष्ठीविभक्तिः बहुवचनम् | पित्रे |
| • तृतीयाविभक्तिः द्विवचनम् | वध्वोः |

## कार्यकलापानां मूल्याङ्कनम्

अध्यापक: कार्यकलापस्य क्रियान्वयनानन्तरं मध्ये अन्ते वा कार्यकलापस्य अधिगमस्य परीक्षणार्थं मूल्याकनं कुर्यात्। एतदर्थम् अध्यापकाणां कृते अध: आरेखन् (रुब्रिक्स) प्रदत्तम् अस्ति। एतदद्वारा अध्यापकः छात्राणां अधिगमस्य प्रगतिं सुनिश्चितं करोति। छात्राणाम् अधिगमे न्यूनता अस्ति तर्हि तेभ्य: सहयोगः दद्यात् तथा च सम्यग् अधिगमं प्रदर्शयति चेत् प्रोत्साहनं दद्यात्। रूब्रिक्स इति आरेखे अध्यापक: उत्तमस्य कृते प्रोत्साहनम्, मध्यमस्य कृते अवधानम् तथा च सामान्यस्य कृते सहयोग: दद्यात्। एतत् दायित्वं अध्यापकस्य/अध्यापिकाया: अस्ति।

| कार्यकलाप: | कार्यकलापे सहभागित्वम् | | | कार्यकलापस्य अवबोध: | | | अवबोधस्य प्रयोग: | | |
|---|---|---|---|---|---|---|---|---|---|
| | उत्तम: | मध्यम: | सामान्य: | उत्तम: | मध्यम: | सामान्य: | उत्तम: | मध्यम: | सामान्य: |
| 1 | | | | | | | | | |
| 2 | | | | | | | | | |
| 3 | | | | | | | | | |
| 4 | | | | | | | | | |
| 5 | | | | | | | | | |
| 6 | | | | | | | | | |
| 7 | | | | | | | | | |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 8 | | | | | | | | | |
| 9 | | | | | | | | | |
| 10 | | | | | | | | | |
| 11 | | | | | | | | | |
| 12 | | | | | | | | | |
| 13 | | | | | | | | | |
| 14 | | | | | | | | | |
| 15 | | | | | | | | | |
| 16 | | | | | | | | | |
| 17 | | | | | | | | | |
| 18 | | | | | | | | | |
| 19 | | | | | | | | | |
| 20 | | | | | | | | | |
| 21 | | | | | | | | | |
| 22 | | | | | | | | | |
| 23 | | | | | | | | | |
| 24 | | | | | | | | | |
| 25 | | | | | | | | | |

## परियोजनाकार्यम्

- प्रत्येकम् उच्चारणस्थानात् उच्चरितानां वर्णानां सूचीनिर्माणं कुरुत।
- **मम प्रियः मित्रम्/मम प्रियं पुस्तकम्** इति विषयं स्वीकृत्य दशवाक्यानि संस्कृतेन लिखत।

# 5 शब्दरूपाणि

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः शब्दरूपाभ्यासे निपुणाः भविष्यन्ति।
- अत्र शब्दरूपाणां त्रिषु लिङ्गेषु अभ्यासः भविष्यति।

## विषयावबोधः

- अध्यापकः शब्दरूपाणां त्रिषु लिङ्गेषु अभ्यासाय शब्दरूपानुगुणं चिटिकानां निर्माणं छात्राणां साहाय्येन कारयेत्।
- अध्यापकः शब्दरूपाणां त्रिषु लिङ्गेषु एकस्य शब्दरूपस्य कृते भिन्नस्य शब्दस्य चयनं कुर्यात्।

## क्रियान्वयनम्




- सर्वप्रथमं अध्यापकः कक्षायां यावन्तः छात्राः समुपस्थिताः सन्ति, तदनुगुणं समानसङ्ख्याकानां समूहानां निर्माणं कुर्यात्।
- छात्राणां साहाय्येन निर्मिताः शब्दरूपचिटिकाः अग्रे उत्पीठिकायां स्थापयेत्।
- प्रत्येकं समूहाय एकं शब्दरूपं श्यामपट्टे लिखेत्।
- अध्यापकः उत्पीठिकायां श्यामपट्टे लिखितस्य प्रत्येकं शब्दरूपस्य चिटिकाः पृथक्-पृथक् स्थापयेत् चिटिकास्तु मिश्रिताः स्युः।



- अध्यापकः उत्पीठिकातः स्वसमूहानुगुणं प्रदत्तशब्दरूपानुसारं चिटिकाः स्वीकर्तुं छात्रम् आह्वयेत्।
- प्रत्येकं समूहात् एकः प्रतिभागी अग्रे आगच्छति, आगत्य उत्पीठिकातः स्वसमूहस्य कृते निर्धारितशब्दरूपानुसारं चिटिकाः स्वीकुर्यात्।
- अध्यापकः सूचयति यद् एताः चिटिकाः व्यवस्थिताः कर्तुं प्रत्येकं समूहाय पञ्चनिमेषात्मकः समयः निश्चितः स्यात्। यः समूहः सर्वप्रथमम् एताः चिटिकाः व्यवस्थिताः करिष्यति तस्मै अङ्काः दीयन्ते।
- अनेन प्रकारेण क्रमः चलिष्यति। अध्यापकः शब्दरूपाणां परिवर्तनं कृत्वा पुनः कार्यकलापं अग्रे सारयेत्।

## आकलनप्रश्नः

**उचितं मेलनं कुरुत—**

| क | ख |
|---|---|
| प्रथमा | रमाम् |
| द्वितीया | गुरवे |
| तृतीया | नदी |
| चतुर्थी | रमाणाम् |
| पञ्चमी | नदीभिः |
| षष्ठी | रामेषु |
| सप्तमी | रामात् |

# 6 धातुरूपाणि 1

## कार्यकलापस्य उद्देश्यम्

- छात्राः धातुरूपाणां परिचयं प्राप्स्यन्ति।
- छात्राः धातुरूपाणाम् अभ्यासं करिष्यन्ति।

## विषयावबोधः

अध्यापकः/अध्यापिका पी.पी.टी. इति माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा धातुरूपाणां (लकाराणाम्) पदानि छात्राणां समक्षम् उपस्थापयति। छात्राणाम् अभ्यासं कारयन् लकारयुक्तपदानि सार्थं बोधयति—

## लट्-लकारस्य वाक्यस्तरे उदाहरणानि

धातुः – पठ्

| | | |
|---|---|---|
| छात्रः पठति। | त्वं पठसि। | अहं पठामि। |
| तौ पठतः। | युवां पठथः। | आवां पठावः। |
| ताः लिखन्ति। | यूयं पठथ। | वयं पठामः। |

## लट्-लकारस्य पदस्तरे उदाहरणानि

| अध्यापकः प्रदर्शयेत्/वदेत् | | छात्राः वदेयुः |
|---|---|---|
| पठ् | ⟶ | पठति |
| लिख् | ⟶ | लिखति |
| गम् | ⟶ | गच्छति |
| पा | ⟶ | पिबति |
| भ्रमति | ⟶ | भ्रम् |
| नयति | ⟶ | नी |
| स्मरति | ⟶ | स्मृ |
| तिष्ठति | ⟶ | स्था |

| | | | | |
|---|---|---|---|---|
| क्रीड् | ⟶ | क्रीडति | क्रीडतः | क्रीडन्ति |
| ज्ञा | ⟶ | जानाति | जानीतः | जानन्ति |
| श्रु | ⟶ | शृणोति | शृणुतः | शृणुवन्ति |
| दा | ⟶ | ददामि | दद्वः | दद्मः |
| रक्ष् | ⟶ | रक्षसि | रक्षथः | रक्षथ |
| मिल् | ⟶ | मिलसि | मिलथः | मिलथ |
| इष् | ⟶ | इच्छसि | इच्छथः | इच्छथ |
| धाव् | ⟶ | धावामि | धावावः | धावामः |
| वद् | ⟶ | वदामि | वदावः | वदामः |

| | | | |
|---|---|---|---|
| **दृश्** | पश्यति | पश्यतः | पश्यन्ति |
| | पश्यसि | पश्यथः | पश्यथ |
| | पश्यामि | पश्यावः | पश्यामः |

| | | | |
|---|---|---|---|
| **कृ** | सः **करोति**। | तौ ............ | ते ............... |
| | त्वं ............ | युवां ............ | यूयं ............ |
| | अहं ............ | आवां ............ | वयं ............ |
| **गै** | ...... ......... | ...... ......... | ...... ......... |
| | ...... ......... | ...... ......... | ...... ......... |
| | ...... ......... | ...... ......... | ...... ......... |
| **खाद्** | ...... ......... | ...... ......... | ...... ......... |
| | ...... ......... | ...... ......... | ...... ......... |
| | ...... ......... | ...... ......... | ...... ......... |
| **नम्** | ...... ......... | ...... ......... | ...... ......... |
| | ...... ......... | ...... ......... | ...... ......... |
| | ...... ......... | ...... ......... | ...... ......... |

## क्रियान्वयनम्

- अध्यापकः/अध्यापिका पी.पी.टी. इति माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा उपरोक्तविधिना विषयम् उपस्थापयति वाचनं च कारयति। अनेन प्रकारेण अन्य-लकाराणाम् अपि अभ्यासं कारयेत्।
- अध्यापकः/अध्यापिका समूहद्वयं निर्माय एकस्मिन् समूहे लकारयुक्तपदानां चिटिकाः प्रदद्यात्। अपरस्मिन् समूहे कर्तृपदानां चिटिकाः दद्यात्। अधुना एकस्य समूहस्य एकः प्रतिभागी स्वचिटिकां पठेत् पुनः अपरस्य समूहस्य प्रतिभागी स्वचिटिकां पठेत्। ततः समुचितेन पदेन सह समुचितं युगलं निर्मायात्। छात्राः अध्यापकस्य अध्यापिकायाः वा सूचनायाः अनुपालनं कुर्वन्तः लकारान् अभ्यसेयुः।
- अध्यापकः/अध्यापिका उपरोक्तविधिना छात्राणां समूहं निर्माय अनेकेषां लकारयुक्तपदानां योजनाबद्धरूपेण अभ्यासं कारयेत्। उपरोक्तप्रकारेण लृट्, लङ्, लोट्, विधिलिङ् इत्येतेषां लकाराणाम् अपि अभ्यासः कारणीयः।

उपरोक्ताः क्रियाकलापाः उदाहरणरूपेण दत्ताः सन्ति। अध्यापकः/अध्यापिका स्वव्यवस्थानुसारं विषयोपस्थापनाय चिन्तयितुं शक्नोति।

## आकलनप्रश्नः

अध्यापकः/अध्यापिका अनेकेषां पदानां साहाय्येन लकाराणाम् आकलनं कुर्यात्।

**अधः प्रदत्तेषु वाक्येषु समुचितं धातुरूपं योजयित्वा वाक्यानि पूरयत—**

(क) छात्रः पुस्तकालये पुस्तकं .................. । (पठ् लट्लकारे)

(ख) श्वः त्वं सुभाषितं .................. ? (वद् लट्लकारे)

(ग) अहं ह्यः विद्यालयं .................. । (गम् लट्लकारे)

(घ) आवां जनन्याः आज्ञां .................. । (पाल् लोट्लकारे)

(ङ) ईश्वरः सर्वान् .................. । (रक्ष् विधिलिङ्लकारे)

# 7 धातुरूपाणि 2

### कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः क्रीडामाध्यमेन पदानाम् अभ्यासे सिद्धाः भविष्यन्ति।
- अत्र सर्वेषां लकाराणाम् अभ्यासः भविष्यति।

### विषयावबोधः

- अध्यापकः अभ्यासाय एकस्य हस्तकन्दुकस्योपरि धातून् लिखेत्।
- लेखनम् अधोलिखितचित्रानुसारं करणीयम्।



- अध्यापकः कार्यकलापस्य पूर्वं यस्य लकारस्य अभ्यासः करणीयः तस्य विषये कक्षायां पूर्वाभ्यासं कारयेत्।
- अध्यापकः छात्राणां साहाय्येन हस्तकन्दुकस्योपरि लिखितानां धातूनां पाठितलकारानुसारेण क्रियापदानां पत्रकनिर्माणं कारयेत्।

### क्रियान्वयनम्



- अध्यापकः सर्वप्रथमम् अभ्यासात् पूर्वं यस्य लकारस्य अभ्यासः करणीयः तस्मिन विषये सूचयेत्।
- छात्राः वर्तुलाकारे स्थिताः भवेयुः।
- अध्यापकः निर्मितानि सर्वाणि क्रियापदपत्रकाणि छात्रैः निर्मितस्य वर्तुलस्य मध्ये स्थापयेत्।



- अध्यापकः हस्तकन्दुकस्योपरि लिखितेषु धातुषु एकस्य उच्चारणं कृत्वा अन्यछात्रं प्रति क्षिपेत्।
- सः छात्रः एकस्य अपरस्य धातोः उच्चारणं कृत्वा हस्तकन्दुकम् अन्यं प्रति क्षिपेत् स्वयञ्च पूर्वोच्चारितधात्वानुसारं मध्ये आगत्य समुचितस्य क्रियापदस्य अन्वेषणं कुर्यात्। यावत् पर्यन्तं समुचितं पदं न प्राप्नुयात् तावत् पर्यन्तं सः पुनः वर्तुले न आगन्तुं शक्नुयात्।
- सः यं छात्रं प्रति हस्तकन्दुकं क्षिपेत् सः अपि अन्यं प्रति क्षिप्त्वा स्वयञ्च पूर्वोच्चारितधात्वानुसारं मध्ये आगत्य समुचितस्य क्रियापदस्य अन्वेषणं कुर्यात्। अयं क्रमः तावत् चलेत् यावत् मध्ये पत्रकाणि अवशिष्टानि भवेयुः।
- अनेन प्रकारेण अध्यापकः कक्षायां पाठितानां लकाराणां पूर्णाभ्यासं कारयेत्।

### आकलनप्रश्नः

अध्यापकः/अध्यापिका अनेकेषां पदानां साहाय्येन लकाराणाम् आकलनं कुर्यात्।

**अधः प्रदत्तेषु वाक्येषु कोष्ठके प्रदत्तलकाराधारेण समुचितं धातुरूपं योजयित्वा वाक्यानि पूरयत—**

(क) छात्रा गीतापुस्तकं .................. । (पठ् – लृट्लकारे)

(ख) सः नूतनं सुभाषितं .................. ? (वद् – विधिलिङ्लकारे)

(ग) भवान् अद्य विद्यालयं .................. । (गम् – लोट्लकारे)

(घ) ह्यः आवां देवालये सुन्दरकाण्डपाठम् .................. । (कृ – लङ्लकारे)

(ङ) ईश्वरः सर्वत्र .................. । (अस् – लट्लकारे)

# 8 अव्ययानि (स्थानबोधकानि)

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः अव्ययपदानां सामान्यज्ञानं प्राप्स्यन्ति।
- छात्राः स्थानबोधकानाम् अव्ययानाम् अभ्यासं करिष्यन्ति।
- छात्राः स्थानबोधकाव्ययानां प्रयोगे निपुणाः भविष्यन्ति।

## विषयावबोधः

अध्यापकः कक्षायां स्थानबोधकानि अव्ययानि अत्र-तत्र-सर्वत्र-अन्यत्र-उभयत्र इत्येतानि साभिनयं बोधयेत्। यथा – श्यामफलकम् अत्र अस्ति। मार्जकः तत्र अस्ति। वायुः सर्वत्र अस्ति। प्रधानाचार्यः अन्यत्र अस्ति। बालकाः उभयत्र सन्ति। एकम् अव्ययम् अधिकृत्य अध्यापकः चतुर्-पञ्च उदाहरणानि वदेत्। अध्यापकः अत्र-तत्र-सर्वत्र-अन्यत्र-उभयत्र इत्येतेषाम् अव्ययपदानां वेगेन साभिनयं वाचनं कारयेत्। इदानीं अध्यापकः कार्यकलापं कारयितुं छात्राणां साहाय्येन बोधितानाम् अव्ययपदानां स्फोरकपत्राणां निर्माणं कारयेत्।




## क्रियान्वयनम्

अध्यापकः कक्षायाः सङ्ख्यानुसारं कक्षां विविधगणेषु विभजेत्। अव्ययानां स्फोरकपत्राणि अध्यापकस्य पुरतः उत्पीठिकायां भवेयुः। अध्यापकः प्रत्येकमपि गणात् एकैकं छात्रम् आह्वयेत्। छात्रः किमपि एकं स्फोरकपत्रं स्वीकृत्य तत्र लिखितम् अव्ययम् उच्चारयेत्। अनन्तरं छात्रः तस्य अव्ययस्य प्रयोगेण एकं लघुवाक्यमपि वदेत्। एवमेव अन्यस्मात् गणात् छात्रः आगच्छेत्, अव्ययस्य उच्चारणं कृत्वा वाक्यं च वदेत्। एषा एव प्रक्रिया आवश्यकतानुसारम् अग्रे सरेत्।

## आकलनप्रश्नः

**अधोलिखितानि अव्ययपदानि आधृत्य वाक्यमेकं लिखत—**

(क) अत्र ..........................................................................

(ख) तत्र ..........................................................................

(ग) सर्वत्र ..........................................................................

(घ) अन्यत्र ..........................................................................

# साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च –2

**1. कोष्ठके प्रदत्तविभक्तिवचनानुगुणं समुचितेन पदेन रिक्तस्थानं पूरयत—**

(क) ................ पादकन्दुकेन क्रीडन्ति। (बालक – प्रथमाविभक्तिः बहुवचनम्)

(ख) ................ धावतः। (अश्व – प्रथमाविभक्तिः द्विवचनम्)

(ग) ................ पत्राणि पतन्ति। (वृक्ष – पञ्चमीविभक्तिः एकवचनम्)

(घ) ................ भोजनं पचति। (पाचक – प्रथमाविभक्तिः एकवचनम्)

(ङ) ................ अवधानेन पठति। (पुस्तक – द्वितीयाविभक्तिः एकवचनम्)

**2. उचितपदैः सह मेलयत —**

| (क) | (ख) |
|---|---|
| प्रथमा | बालिकया |
| द्वितीया | गुरुम् |
| तृतीया | शिशोः |
| चतुर्थी | फलेषु |
| पञ्चमी | मतिः |
| षष्ठी | मात्रे |
| सप्तमी | रामात् |

**3. अधः प्रदत्तेषु वाक्येषु समुचितं धातुरूपं योजयित्वा वाक्यानि पूरयत—**

- सः प्रतिदिनं विद्यालयं .............। (गम् – लट्लकार)
- राधा सुभाषितं ............. .......। (वद् – विधिलिङ्लकार)
- अहं श्वः गीतापाठं .................। (कृ – लृट्लकार)
- वयं ज्येष्ठानाम् आज्ञां ..............। (पाल् – लोट्लकारे)
- तत् फलं वृक्षात् ..................। (पत् – लङ्लकार)।

**4. प्रदत्त-उदाहरणानि दृष्ट्वा लकारानुसारं धातुरूपाणि लिखत—**

| | | | |
|---|---|---|---|
| गम् (लट्लकारः) | गच्छति | गच्छतः | गच्छन्ति |
| खाद् | ............... | ............ | ......... |
| वद् (लोट्लकार) | वदतु | वदताम् | वदन्तु |
| नम् | ............... | ......... | ............... |
| दृश् (विधिलिङ्लकार) | पश्येत् | पश्येताम् | पश्येयुः |
| स्मृ | ............... | ............ | ......... |
| कृ (लङ्लकार) | अकरोत् | अकुरुताम् | अकुर्वन् |
| हृ | ............... | ............ | ......... |
| लिख् (लृट्लकार) | लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति |
| हस् | ............... | ............... | ......... |

**5. मञ्जूषातः उचित-अव्ययपदं चित्वा रिक्तस्थानानि पूरयत—**

तत्र अन्यत्र सर्वत्र कुत्र अत्र

(क) अहं श्वः ग्रामं गमिष्यामि ........................... मम मित्रं निवसति।

(ख) आचार्यः छात्रान् सूचयति यत् ईश्वरः ........................... अस्ति।

(ग) शिशुः मातरं पृच्छति— "मम क्रीडनकं ........................... अस्ति"?

(घ) मम एकं कथापुस्तकम् ........................... अस्ति।

(ङ) वयम् अस्मिन् मासे जयपुरं गच्छामः अग्रिममासे ........................... गमिष्यामः।

## कार्यकलापानां मूल्याङ्कनम्

अध्यापकः कार्यकलापस्य क्रियान्वयनानन्तरं मध्ये अन्ते वा कार्यकलापस्य अधिगमस्य परीक्षणार्थं मूल्याकनं कुर्यात्। एतदर्थम् अध्यापकाणां कृते अधः आरेखन् (रुब्रिक्स) प्रदत्तम् अस्ति। एतदद्वारा अध्यापकः छात्राणां अधिगमस्य प्रगतिं सुनिश्चितं करोति। छात्राणाम् अधिगमे न्यूनता अस्ति तर्हि तेभ्यः सहयोगः दद्यात् तथा च सम्यग् अधिगमं प्रदर्शयति चेत् प्रोत्साहनं दद्यात्। रूब्रिक्स इति आरेखे अध्यापकः उत्तमस्य कृते प्रोत्साहनम्, मध्यमस्य कृते अवधानम् तथा च सामान्यस्य कृते सहयोगः दद्यात्। एतत् दायित्वं अध्यापकस्य/अध्यापिकायाः अस्ति।

| कार्यकलापः | कार्यकलापे सहभागित्वम् | | | कार्यकलापस्य अवबोधः | | | अवबोधस्य प्रयोगः | | |
|---|---|---|---|---|---|---|---|---|---|
| | उत्तमः | मध्यमः | सामान्यः | उत्तमः | मध्यमः | सामान्यः | उत्तमः | मध्यमः | सामान्यः |
| 1 | | | | | | | | | |
| 2 | | | | | | | | | |
| 3 | | | | | | | | | |
| 4 | | | | | | | | | |
| 5 | | | | | | | | | |
| 6 | | | | | | | | | |
| 7 | | | | | | | | | |
| 8 | | | | | | | | | |
| 9 | | | | | | | | | |
| 10 | | | | | | | | | |
| 11 | | | | | | | | | |
| 12 | | | | | | | | | |
| 13 | | | | | | | | | |
| 14 | | | | | | | | | |
| 15 | | | | | | | | | |
| 16 | | | | | | | | | |
| 17 | | | | | | | | | |
| 18 | | | | | | | | | |
| 19 | | | | | | | | | |
| 20 | | | | | | | | | |
| 21 | | | | | | | | | |
| 22 | | | | | | | | | |
| 23 | | | | | | | | | |
| 24 | | | | | | | | | |
| 25 | | | | | | | | | |

## परियोजनाकार्यम्

- गै, धाव् इति धातुद्वयं स्वीकृत्य पञ्चलकारेषु (लट्-लृट्-लोट्-लङ्-विधिलिङ् इति) रूपाणि लिखत
- अत्र-तत्र-सर्वत्र-अन्यत्र-उभयत्र इति अव्ययपदानि आधारीकृत्य पञ्च-पञ्चवाक्यानि लिखत।

# 9 कारकाभ्यासः 1

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः वाक्यनिर्माणे निपुणाः भविष्यन्ति।
- अत्र सर्वासां विभक्तीनाम् अभ्यासः भविष्यति।

## विषयावबोधः

- अध्यापकः अभ्यासाय श्यामपट्टे शब्दरूपाणां मूलं शब्दं लिखेत्।
- अध्यापकः अभ्यासात् पूर्वं यस्याः विभक्तेः अभ्यासम् इच्छेत् तस्याः विषये पूर्वतः कक्षायां सूचयेत्।

## क्रियान्वयनम्

- सर्वप्रथमं अध्यापकः कक्षायां यावन्तः छात्राः समुपस्थिताः स्युः, तदनुगुणं समानसङ्ख्याकानां समूहानां निर्माणं कुर्यात्।
- अध्यापकः छात्राणां साहाय्येन श्यामपट्टे शब्दरूपाणां मूलं शब्दं लिखेत् यथा – बालक, नदी, हरि, बालिका, फल, शिशु इत्यादि।
- अभ्यासात् पूर्वं यस्याः विभक्तेः अभ्यासः करणीयः, अध्यापकः तस्याः विषये कक्षायां सूचयेत्।
- प्रथमसमूहात् एकः प्रतिभागी अग्रे आगच्छेत्, आगत्य श्यामपट्टे शब्दरूपाणां मूलं शब्दं दृष्ट्वा पठित्वा च चयनितविभक्त्यनुसारं समुचितं पदं लिखेत्। यथा अध्यापकः द्वितीयां विभक्तिं स्वीकरोति तेन कार्यकलापस्य स्वरूपम् इत्थं भविष्यति —

| | | | | | |
|---|---|---|---|---|---|
| बालक | नदी | सिंह | पुस्तक | श्यामपट्ट | काक |
| बालिका | फल | पत्र | कथा | पत्रिका | पेटिका |
| शिशु | मति | दीपक | विद्यालय | लेखनी | वधू |

- अनेन प्रकारेण एव द्वितीयसमूहात् एकः प्रतिभागी अग्रे आगच्छेत्, आगत्य श्यामपट्टे शब्दरूपाणां मूलं शब्दं दृष्ट्वा पठित्वा च चयनितविभक्त्यनुसारं समुचितं पदं लिखेत्।

| | | | | | |
|---|---|---|---|---|---|
| बालकम् | नदीम् | सिंहम् | पुस्तकम् | श्यामपट्टम् | काकम् |
| बालिकाम् | फलम् | पत्रम् | कथाम् | पत्रिकाम् | पेटिकाम् |
| शिशुम् | मतिम् | दीपकम् | विद्यालयम् | लेखनीम् | वधूम् |

- अनेन प्रकारेण क्रमः चलिष्यति। अन्ते लिखितानां शब्दरूपाणां निरीक्षणं कृत्वा त्रुटियुतानां शब्दरूपाणां परिष्कारः छात्राणां साहाय्येन कारयेत्।

## आकलनप्रश्नः

**अधोलिखितस्तम्भशब्दानां समुचितं मेलनं कुरुत—**

| (क) | (ख) |
|---|---|
| प्रथमा | पत्रिकायाम् |
| द्वितीया | दीपकेन |
| तृतीया | पुस्तकस्य |
| चतुर्थी | पत्रम् |
| पञ्चमी | फलाय |
| षष्ठी | हे बालक |
| सप्तमी | नदी |
| सम्बोधनम् | विद्यालयात् |

# 10 कारकाभ्यासः 2

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः वाक्यनिर्माणे सिद्धाः भविष्यन्ति।
- अत्र सर्वासां विभक्तीनां स्तरद्वये अभ्यासः भविष्यति।

## विषयावबोधः

- अध्यापकः अभ्यासाय श्यामपट्टे शब्दरूपाणां मूलं शब्दं लिखेत्।
- अभ्यासात् पूर्वं यस्याः विभक्तेः अभ्यासः करणीयः, अध्यापकः तस्याः विषये कक्षायां सूचयेत्।

## क्रियान्वयनम्

- आदौ अध्यापकः कक्षायां यावन्तः छात्राः समुपस्थिताः सन्ति, तदनुगुणं समानसङ्ख्याकानां समूहानां निर्माणं कुर्यात्।
- अभ्यासात् पूर्वं यस्याः विभक्तेः अभ्यासः करणीयः, अध्यापकः तस्यां: विषये कक्षायां सूचयेत्। अध्यापकः छात्राणां साहाय्येन श्यामपट्टे एकस्मिन् भागे शब्दरूपाणां मूलं शब्दं लिखेत् अपरस्मिन् भागे च क्रियापदानि लिखेत्। ततः छात्रं उचितरूपेण रिक्तस्थानपूर्तिं कर्तुं प्रेरयेत् यथा –

| | | | | |
|---|---|---|---|---|
| बालक | ..................................... | पत्र | ..................................... | लिखति। |
| शिशु | ..................................... | दुग्ध | ..................................... | पिबति। |
| हरि | ..................................... | पुस्तक | ..................................... | पठति। |

## प्रथमस्तरः (लघुवाक्याभ्यासः/लघुवाक्यस्तरे)

- प्रथमसमूहात् प्रतिभागीद्वयम् अग्रे आगच्छेत्, आगत्य श्यामपट्टे एकस्य शब्दरूपस्य मूलं शब्दं दृष्ट्वा पठित्वा च चयनितविभक्त्यनुसारं समुचितकर्तृपदं तदनुगुणं क्रियापदं च लिखेत्।
- अनेन प्रकारेण एव द्वितीयसमूहात् प्रतिभागीद्वयम् अग्रे आगच्छेत्, आगत्य श्यामपट्टे एकस्य शब्दरूपस्य मूलं शब्दं दृष्ट्वा पठित्वा च चयनितविभक्त्यनुसारं समुचितकर्तृपदं तदनुगुणं क्रियापदं च लिखेत्।
- अनेन प्रकारेण क्रमः चलिष्यति। अन्ते लिखितानां शब्दरूपाणां क्रियापदानां च निरीक्षणं कृत्वा त्रुटियुतानां वाक्यानां परिष्कारः छात्राणां साहाय्येन कारयेत्।

## द्वितीयस्तरः

सर्वप्रथमं अध्यापकः कक्षायां नूतनकथारचनाविषये सूचनां दद्यात्। छात्राणां साहाय्येन श्यामपट्टे कस्याः अपि कथायाः शीर्षकं लिखेत्। यथा–

चतुरः काकः .....




- प्रथमसमूहात् एकः प्रतिभागी अग्रे आगच्छेत्, आगत्य श्यामपट्टे प्रदर्शितं शीर्षकं दृष्ट्वा पठित्वा च एकं वाक्यं लिखेत्।
- अनेन प्रकारेण एव द्वितीयसमूहात् एकः प्रतिभागी अग्रे आगच्छेत्, आगत्य श्यामपट्टे प्रदर्शितं शीर्षकं दृष्ट्वा पठित्वा च कथारचनायाः दृष्ट्या एकं वाक्यं लिखेत्।
- अनेन प्रकारेण वाक्यलेखनस्य क्रमः चलिष्यति।
- ध्यातव्यं यत् छात्रैः लिखितानि वाक्यानि अनन्तकथारचनानुगुणं भवन्तु। अध्यापकः अन्ते लिखितानां वाक्यानां निरीक्षणं कृत्वा त्रुटियुतानां वाक्यानां परिष्कारः छात्राणां साहाय्येन कारयेत्।

## आकलनप्रश्नः

अध्यापकः सम्पूर्णकार्यकलापम् आधारीकृत्य छात्रैः पृथक्-पृथक् वाक्यरचनां कारयित्वा आकलनं कुर्यात्।

**उचितपदेन रिक्तस्थानानि पूरयत—**

| | |
|---|---|
| (क) बालकः ................ खादति। | (फलेन/ फलम्/ फलस्य) |
| (ख) ................ ग्रामं गच्छति। | (लता/ लताम्/ लतया) |
| (ग) हरीशः ................ लिखति। | (लेखनी/ लेखनीम्/ लेखन्या) |
| (घ) शिशुः ................ पिबति। | (दुग्धेन/ दुग्धे/ दुग्धम्) |
| (ङ) इदं ................ पुस्तकम् अस्ति। | (गीता/ गीतायाः/ गीतायाम्) |

# 11 उपपदविभक्ति-अभ्यासः 1 (द्वितीया-चतुर्थीविभक्तिः)

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः क्रीडामाध्यमेन उपपदविभक्तेः अभ्यासे निपुणाः भविष्यन्ति।
- अत्र द्वितीयाविभक्तितः चतुर्थीविभक्तिपर्यन्तम् अभ्यासः भविष्यति।

## विषयावबोधः

- अध्यापकः कार्यकलापस्य आयोजनात् प्राक् द्वितीयाविभक्तितः चतुर्थीविभक्तिपर्यन्तम् उपपदानाम् अभ्यासं कारयेत्।
- अध्यापकः छात्राणां साहाय्येन पत्रकनिर्माणं कारयेत् यस्योपरि **अभितः, साकम्, अलम्, नमः** इत्यादीनि द्वितीयाविभक्तितः चतुर्थीविभक्तिपर्यन्तं तम् उपपदानि लिखितानि स्युः।

## क्रियान्वयनम्

- अध्यापकः अभ्यासात् प्राक् छात्रान् सूचयेत् यद् अद्य वयं द्वितीयाविभक्तितः चतुर्थीविभक्तिपर्यन्तम् उपपदानाम् अभ्यासं करिष्यामः।
- छात्राः वर्तुलाकारे स्थिताः भवेयुः।
- अध्यापकः सूचयेत् यद् अहम् पूर्वचर्चितेषु पदेषु एकं पदं वदिष्यामि भवत्सु कोऽपि / काऽपि तदाधारेण प्रथमं वाक्यनिर्माणं करिष्यति। सः/सा एव एतस्य कार्यकलापस्य प्रमुखः/प्रमुखा भविष्यति।

| **अध्यापकः** | **छात्रः/छात्रा** |
|---|---|
| अभितः | मम अभितः छात्राः सन्ति। |

उत्तमम्, अधुना भवान्/भवती प्रमुखः/प्रमुखा अस्ति।

- अधुना अध्यापकः तस्मै/तस्यै तत् पत्रकं दद्यात् यस्योपरि **अभितः, साकम्, अलम्, नमः** इत्यादीनि द्वितीयाविभक्तितः चतुर्थीविभक्तिपर्यन्तम् उपपदानि लिखितानि स्युः।
- प्रमुखः/प्रमुखा पत्रकस्योपरि लिखितेषु पदेषु एकस्य अपरस्य पदस्य उच्चारणपुरस्सरं छात्रैः निर्मितायाः गोलाकाराकृतेः बहिः धावनं कुर्यात्। उच्चरितं पदं



स्वीकृत्य यः/या प्रथमं वाक्यनिर्माणं करिष्यति सः/सा पूर्वधावतः प्रमुखस्य पुरतः युक्तः/युक्ता भविष्यति।

- पूर्वप्रमुखः/प्रमुखा पदलिखितपत्रकं तस्मै/तस्यै दद्यात्। अधुना सः/सा प्रमुखः/प्रमुखा भविष्यति।
- अनेन क्रमेण कार्यकलापः अन्तिमं छात्रं यावत् चलिष्यति एवञ्च रेलयानस्य निर्माणं भविष्यति।



### आकलनप्रश्नः

**मञ्जूषातः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत—**

| | | | | | |
|---|---|---|---|---|---|
| अभितः | साकम् | अलम् | नमः | प्रति | विना |

(क) मेधांशः पितामहेन ............................ मन्दिरं गच्छति।

(ख) मार्गम् ............................ वृक्षाः सन्ति।

(ग) जलं ............................ जीवनं सरलं नास्ति।

(घ) ज्येष्ठेभ्यः ............................

(ङ) बालाः विद्यालयं ............................ गच्छन्ति।

(च) कोलाहलेन ............................

# 12 उपपदविभक्ति-अभ्यासः 2 (पञ्चमी-सप्तमीविभक्तिः)

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः क्रीडामाध्यमेन उपपदविभक्तेः प्रयोगे निपुणाः भविष्यन्ति।
- अत्र पञ्चमीविभक्तितः सप्तमीविभक्तिपर्यन्तम् अभ्यासः भविष्यति।

## विषयावबोधः

- अध्यापकः कार्यकलापस्य आयोजनात् प्राक् पञ्चमीविभक्तितः सप्तमीविभक्तिपर्यन्तम् उपपदानि उद्बोध्य अभ्यासं कारयेत्।
- अध्यापकः छात्राणां साहाय्येन पत्रकनिर्माणं कारयेत् यस्योपरि **बहिः, पूर्वम्, ऋते, निपुणः, दक्षः** इत्यादीनि पञ्चमीविभक्तितः सप्तमीविभक्तिपर्यन्तं उपपदानि लिखितानि स्युः।

## क्रियान्वयनम्



- अध्यापकः अभ्यासात् प्राक् छात्रान् सूचयेत् यद् अद्य वयं पञ्चमीविभक्तितः सप्तमीविभक्तिपर्यन्तम् उपपदानाम् अभ्यासं करिष्यामः।
- छात्राः वर्तुलाकारे स्थिताः भवेयुः।
- अध्यापकः सूचयेत् यद् अहम् पूर्वचर्चितेषु पदेषु एकं पदं वदिष्यामि भवत्सु यः/या तत् पदं स्वीकृत्य सर्वप्रथमं वाक्यनिर्माणं करिष्यति सः सा वा एतस्य क्रियाकलापस्य प्रमुखः प्रमुखा वा भविष्यति।

| **अध्यापकः वदति** | **छात्रः/छात्राः वदति** |
|---|---|
| बहिः | अहं कक्षायाः गणात् बहिः गच्छामि। |

उत्तमम्, अधुना भवान् /भवती प्रमुखः/ प्रमुखा अस्ति।



- अधुना अध्यापकः तस्मै/तस्यै तत् पत्रकं दद्यात् यस्योपरि **बहिः, पूर्वम्, ऋते, निपुणः, दक्षः** इत्यादीनि पञ्चमीविभक्तितः सप्तमीविभक्तिपर्यन्तं पदानि लिखितानि स्युः।
- प्रमुखः/प्रमुखा पत्रकस्योपरि लिखितेषु पदेषु एकस्य अपरस्य पदस्य उच्चारणपुरस्सरं छात्रैः निर्मितायाः गोलाकाराकृतेः बहिः धावनं कुर्यात्। उच्चरितं पदं स्वीकृत्य यः/या वाक्यनिर्माणं करिष्यति सः/सा पूर्वधावतः प्रमुखस्य पुरतः युक्तः/युक्ता भविष्यति।

- पूर्वप्रमुखः/प्रमुखा पदलिखितपत्रकं तस्मै/ तस्यै दद्यात्। अधुना सः/सा प्रमुखः/प्रमुखा भविष्यति।
- अनेन क्रमेण क्रियाकलापः अन्तिमच्छात्रं यावत् चलिष्यति एवञ्च रेलयानस्य निर्माणं भविष्यति।

### आकलनप्रश्नः

**मञ्जूषातः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत—**

बहिः पूर्वम् ऋते गायने दक्षः विद्यायाः वृक्षस्य उपरि प्रवीणा

(क) मिहिरः चित्रनिर्माणे ............................ अस्ति।

(ख) ............................ अतः हरिणः अस्ति।

(ग) ग्रामात् ............................ मन्दिराणि सन्ति।

(घ) पुष्पस्य ............................ मधुमक्षिका डयते।

(ङ) ............................ विना मानवः मानवः नास्ति।

(च) अविका नृत्ये ............................ अस्ति।

(छ) जलात् ............................ अन्नं न उत्पद्यते।

(ज) बालकः ............................ निपुणः अस्ति।

(झ) आगमनात् ............................ कृपया सूचयतु।

# साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च –3

**1. निर्देशानुसारं विभक्तयः लिखत—**

| शब्द | विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| महेश | पञ्चमी | महेशात् | महेशाभ्याम् | महेशेभ्यः |
| देवी | तृतीया | ........... | ............. | ........... |
| अध्यापक | सप्तमी | ........... | ............ | .......... |
| फलम् | षष्ठी | ........... | ............ | ........... |
| नेतृ | द्वितीया | ........... | ............. | ........... |
| पत्रिका | चतुर्थी | .......... | ............. | ........... |
| वधू | प्रथमा | ........... | ............ | ............ |

**2. कोष्ठके प्रदत्तविभक्तिवचनानुगुणं समुचितेन पदेन वाक्यानि पूरयत—**

(क) बालकाः क्रीडितुम् ........................................ गच्छन्ति।

*(उद्यान – द्वितीयाविभक्तिः एकवचनम्)*

(ख) जनाः ........................................ कृषिकार्यं सम्पादयन्ति।

*(खनित्र – तृतीयाविभक्तिः एकवचनम्)*

(ग) शिशुः ........................................ कन्दुकं गृहणाति।

*(हस्त – तृतीयाविभक्तिः द्विवचनम्)*

(घ) छात्राः पाठ्यपुस्तकानि ........................................ स्थापयन्ति।

*(स्यूत – सप्तमीविभक्तिः एकवचनम्)*

(ङ) बालकः ........................................ पतति।

*(अश्व – पञ्चमीविभक्तिः एकवचनम्)*

**3. मञ्जूषातः उचितपदानि चित्वा कथां पूरयत—**

| | | | |
|---|---|---|---|
| चञ्च्वा | घटे | एकस्मिन् | आनन्देन |
| काकस्य | घटस्य | घटम् | शिलाखण्डानि |

एकः काकः आसीत्। सः बहु पिपासितः आसीत्। सः जलार्थं सर्वत्र अभ्रमत्, किन्तु कुत्रापि जलं न प्राप्तवान्। काकः जलार्थं बहुदूरं ................ ग्रामे स्थितम् उद्यानम् अगच्छत्। तत्र सः एकं ................ अपश्यत्। घटं दृष्ट्वा ................ अतीव सन्तोषः अभवत्, किन्तु ................ स्वल्पम् एव जलम् आसीत्। जलं कथं पिबामि ? इति काकः अचिन्तयत्। सः एकम् उपायम् अचिन्तयत्। सः काकः ................ पार्श्वे पतितानि ................ एकं एकं कृत्वा ................ घटे अस्थापयत्। अनेन शिलाखण्डपातनेन जलम् उपरि आगतम्। काकः सन्तोषेण जलम् अपिबत्। जलं पीत्वा सः स्वनीडं प्रति अगच्छत्।

**4. रेखाङ्कितपदानि आधारीकृत्य अधोलिखितानि वाक्यानि शुद्धानि कृत्वा पुनः लिखत—**

- मेधांशः पितामहस्य सह मन्दिरं गच्छति।
 ..........................................................................................
- नद्याः अभितः वृक्षाः सन्ति।
 ..........................................................................................
- जलस्य विना जीवनं सरलं नास्ति।
 ..........................................................................................
- नमः ज्येष्ठान्।
 ..........................................................................................
- बालाः क्रीडाङ्गणस्य प्रति गच्छन्ति।
 ..........................................................................................
- व्यर्थवार्तालापात् अलम्।
 ..........................................................................................

**5. प्रदत्त उदाहरणानुगुणं स्थूलपदम् अधिकृत्य विवेचनं कुरुत—**

यथा – ग्रामात् बहिः आपणम् अस्ति।

विभक्तिः – पञ्चमी वचनम् – एकवचनम् उपपदम् – बहिः

| प्रथमसमूहः | द्वितीयसमूहः |
|---|---|
| • मिहिरः गायने निपुणः अस्ति। | विभक्तिः ………… वचनम् ………… पपदम् ………… |
| • वृक्षस्य अधः पादपः अस्ति। | विभक्तिः ………… वचनम् ………… पपदम् ………… |
| • भोजनात् पूर्वं हस्तप्रक्षालनं करोतु। | विभक्तिः ………… वचनम् ………… पपदम् ………… |
| • भवनस्य उपरि वानरः अस्ति। | विभक्तिः ………… वचनम् ………… पपदम् ………… |
| • विद्यायाः विना मानवः पशुसमानः। | विभक्तिः ………… वचनम् ………… पपदम् ………… |

## कार्यकलापानां मूल्याङ्कनम्

अध्यापक: कार्यकलापस्य क्रियान्वयनानन्तरं मध्ये अन्ते वा कार्यकलापस्य अधिगमस्य परीक्षणार्थं मूल्याकनं कुर्यात्। एतदर्थम् अध्यापकाणां कृते अध: आरेखन् (रुब्रिक्स) प्रदत्तम् अस्ति। एतदद्वारा अध्यापकः छात्राणां अधिगमस्य प्रगतिं सुनिश्चितं करोति। छात्राणाम् अधिगमे न्यूनता अस्ति तर्हि तेभ्य: सहयोगः दद्यात् तथा च सम्यग् अधिगमं प्रदर्शयति चेत् प्रोत्साहनं दद्यात्। रूब्रिक्स इति आरेखे अध्यापक: उत्तमस्य कृते प्रोत्साहनम्, मध्यमस्य कृते अवधानम् तथा च सामान्यस्य कृते सहयोग: दद्यात्। एतत् दायित्वं अध्यापकस्य/अध्यापिकाया: अस्ति।

| कार्यकलाप: | कार्यकलापे सहभागित्वम् | | | कार्यकलापस्य अवबोध: | | | अवबोधस्य प्रयोग: | | |
|---|---|---|---|---|---|---|---|---|---|
| | उत्तम: | मध्यम: | सामान्य: | उत्तम: | मध्यम: | सामान्य: | उत्तम: | मध्यम: | सामान्य: |
| 1 | | | | | | | | | |
| 2 | | | | | | | | | |
| 3 | | | | | | | | | |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 4 | | | | | | | | | |
| 5 | | | | | | | | | |
| 6 | | | | | | | | | |
| 7 | | | | | | | | | |
| 8 | | | | | | | | | |
| 9 | | | | | | | | | |
| 10 | | | | | | | | | |
| 11 | | | | | | | | | |
| 12 | | | | | | | | | |
| 13 | | | | | | | | | |
| 14 | | | | | | | | | |
| 15 | | | | | | | | | |
| 16 | | | | | | | | | |
| 17 | | | | | | | | | |
| 18 | | | | | | | | | |
| 19 | | | | | | | | | |
| 20 | | | | | | | | | |
| 21 | | | | | | | | | |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 22 | | | | | | | | | |
| 23 | | | | | | | | | |
| 24 | | | | | | | | | |
| 25 | | | | | | | | | |

## परियोजनाकार्यम्

- **मम दिनचर्या** इति शीर्षकम् अधिकृत्य दशवाक्यानि संस्कृतभाषायां लिखत।
- द्वितीयाविभक्तितः सप्तमीविभक्तिपर्यन्तं कार्यकलापेषु प्रयुक्तानाम् उपपदविभक्तिपदानां वाक्यप्रयोगं कृत्वा स्फोरकपत्रस्य निर्माणं कुरुत।

# 13 सन्धयः

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः सन्धियुक्तपदानां परिचयं प्राप्स्यन्ति।
- अनेन कार्यकलापेन छात्राः सन्धियुक्तपदानि सन्धिरहितपदानि च अभ्यस्यन्ति।

## विषयावबोधः

अध्यापकः/अध्यापिका पी.पी.टी. इति माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा सन्धियुक्तपदानि सन्धिरहित-पदानि च छात्राणां समक्षम् उपस्थापयति। छात्राणाम् अभ्यासं कारयन् सन्धियुक्तपदं सन्धिरहितपदं च बोधयति –

## स्वरसन्धि-उदाहरणानि

| | | | |
|---|---|---|---|
| विद्या + आलयः | (आ + आ) | = | विद्यालयः |
| रजनी + ईशः | (ई + ई) | = | रजनीशः |
| गण + ईशः | (अ + ई) | = | गणेशः |
| जन्म + उत्सवः | (अ + उ) | = | जन्मोत्सवः |
| तथा + एव | (आ + ए) | = | तथैव |
| मम + ओषधम् | (अ + ओ) | = | ममौषधम् |
| इति + आदिः | (इ + आ) | = | इत्यादिः |
| गुरु + आज्ञा | (उ + आ) | = | गुर्वाज्ञा |
| चे + अनम् | (ए + अ) | = | चयनम् |
| पो + अनः | (ओ + अ) | = | पवनः |
| को + अपि | (ओ + अ) | = | कोऽपि |

## व्यञ्जनसन्धिः-उदाहरणानि

| | | | |
|---|---|---|---|
| वाक् + ईशः | (क् + ई) | = | वागीशः |
| षट् + वादनम् | (ट् + वा) | = | षड्वादनम् |
| अच् + अन्तः | (च् + अ) | = | अजन्तः |
| एतत् + छत्रम् | (त् + छ) | = | एतच्छत्रम् |
| चलत्+ चित्रम् | (त् + च) | = | चलच्चित्रम् |
| जगत् + ईशः | (त् + ई) | = | जगदीशः |

## विसर्गसन्धि-उदाहरणानि

| | | | |
|---|---|---|---|
| छात्रः + गच्छति | (अः + ग) | = | छात्रो गच्छति |
| रामः + राजते | (अः + र) | = | रामो राजते |
| मृगः + चरति | (अः + च) | = | मृगश्चरति |
| देवः + शक्नोति | (अः + श) | = | देवश्शक्नोति |
| बालः + षष्ठः | (अः + ष) | = | बालष्षष्ठः |
| सर्पः + सरति | (अः + स) | = | सर्पस्सरति |
| इतः + ततः | (अः + त) | = | इतस्ततः |

## क्रियान्वयनम्

1. अध्यापकः/अध्यापिका समूहद्वयं निर्माय एकस्मिन् समूहे सन्धियुक्तपदानां चिटिकाः प्रदद्यात्। अपरस्मिन् समूहे सन्धिरहितपदानां चिटिकाः दद्यात्। पश्चात् छात्रान् सूचयेत्— भोः छात्राः! भवतां समूहे चिटिकाः सन्ति। अधुना एकस्य समूहस्य एकः प्रतिभागी स्वचिटिकां पठेत्। पुनः अपरस्य समूहस्य प्रतिभागी तत्सम्बद्धां स्वचिटिकां पठेत्। पुनः समुचितेन सन्धिरहितपदेन/सन्धियुक्तपदेन सह समुचितस्य सन्धिरहितपदस्य/सन्धियुक्तपदस्य युगलं निर्मायात्। अनेन प्रकारेण अध्यापकः/अध्यापिका एतां प्रक्रियां सारयेत्। छात्राः अध्यापकस्य/ अध्यापिकायाः वा सूचनायाः अनुपालनं कुर्युः।
2. अध्यापकः/अध्यापिका उपरोक्तविधिना छात्राणां समूहं निर्माय अनेकेषां सन्धियुक्तपदानां सन्धिरहितपदानां च योजनां कृत्वा अभ्यासं कारयेत्।

उपरोक्ताः क्रियाकलापाः उदाहरणरूपेण दत्ताः सन्ति। अध्यापकः/अध्यापिका स्वव्यवस्थानुसारं विषयोपस्थापनाय चिन्तयितुं शक्नोति।

## आकलनप्रश्नः

अध्यापकः/अध्यापिका अनेकेषां पदानां साहाय्येन आकलनं कुर्यात्।

**अधः प्रदत्तेषु वाक्येषु रेखाङ्कितानां पदानां सन्धिं सन्धिच्छेदं वा कुरुत—**

(क) छात्रः <u>पुस्तकालयं</u> गत्वा पुस्तकं पठति।

(ख) <u>कोऽपि</u> अत्र न तिष्ठति।

(ग) <u>रामः + चर्चां</u> करोति।

(घ) सर्वे <u>जननी+आज्ञां</u> पालयन्तु।

(ङ) ईश्वरः <u>जगद् रक्षति</u>।

# 14 अव्ययानि (प्रश्नवाचकानि)

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः अव्ययपदानां सामान्यज्ञानं प्राप्स्यन्ति।
- छात्राः प्रश्नवाचकानाम् अव्ययानाम् अभ्यासं करिष्यन्ति।
- छात्राः प्रश्नवाचकाव्ययानां प्रयोगे निपुणाः भविष्यन्ति।

## विषयावबोधः

अध्यापकः कक्षायां (प्रश्नवाचकानि अव्ययानि) किम्-कुत्र-कदा-कुतः-कथम्-किमर्थम् इत्येतान् श्यामफलकमाध्यमेन पीपीटी इति माध्यमेन वा साभिनयं बोधयेत्। यथा –

| अव्ययानि | अध्यापकः वदति | | छात्राः वदन्ति |
|---|---|---|---|
| **किम्** | • एतत् फलम्।<br>• मम नाम शेखरः। | • एतत् **किम्?**<br>• भवतः/भवत्याः नाम **किम्?** | • एतत् फलम्।<br>• मम नाम रोहनः/रमा। |
| **कुत्र** | • मार्जकः तत्र अस्ति।<br>• माता गृहे अस्ति। | • मार्जकः **कुत्र** अस्ति?<br>• पिता **कुत्र** अस्ति? | • मार्जकः तत्र अस्ति।<br>• पिता आपणे अस्ति। |
| **कदा** | • रात्रौ दधि न भुञ्जीत।<br>• अहं प्रातः पञ्चवादने उत्तिष्ठामि। | • **कदा** दधि न भुञ्जीत।<br>• भवन्तः **कदा** उत्तिष्ठन्ति? | • रात्रौ दधि न भुञ्जीत।<br>• अहं ............. वादने उत्तिष्ठामि। |
| **कुतः** | • बालः विद्यालयतः आगच्छति।<br>• राधा गृहतः गच्छति। | • बालः **कुतः** आगच्छति।<br>• राधा **कुतः** गच्छति? | • बालः विद्यालयतः आगच्छति।<br>• राधा गृहतः गच्छति। |
| **कथम्** | • अहं कुशली अस्मि।<br>• कार्यक्रमः उत्तमः आसीत्। | • भवान् **कथम्** अस्ति?<br>• कार्यक्रमः **कथम्** आसीत्? | • अहम् अपि कुशली अस्मि।<br>• कार्यक्रमः उत्तमः आसीत्। |
| **किमर्थम्** | • बालकः पठनार्थं विद्यालयं गच्छति।<br>• भिक्षुकः भोजनार्थं याचते। | • भवान्/भवती **किमर्थम्** विद्यालयम् आगच्छति।<br>• भिक्षुकः **किमर्थम्** याचते? | • अहम ............. विद्यालयम् आगच्छामि।<br>• भिक्षुकः भोजनार्थं याचते। |

एकं प्रश्नवाचकम् अव्ययम् अधिकृत्य अध्यापकः चतुर् वा पञ्च उदाहरणानि उपस्थापयेत्। वाक्यानाम् अनन्तरं अध्यापकः पदस्तरे अपि प्रश्नवाचकानि अव्ययानि छात्रैः वाचयेत्।

किम् कुत्र

किमर्थम् कदा

कथम् कुतः

## क्रियान्वयनम्

अध्यापकः कक्षां गणद्वये विभजेत्। एकस्मात् गणात् एकः छात्रः उत्थाय किमपि एकं प्रश्नवाचकम् अव्ययम् प्रयुज्य स्वेच्छया एकं प्रश्नं पृच्छेत्। अन्यस्मात् गणात् कोऽपि छात्रः तस्य उत्तरं वदेत्। इदानीं स एव छात्रः अन्यत् किमपि एकं प्रश्नवाचकम् अव्ययम् प्रयुज्य स्वेच्छया एकं प्रश्नं पृच्छेत्। अधुना अन्यस्मात् गणात् कोऽपि छात्रः तस्य उत्तरं वदेत्। एषा एव प्रक्रिया आवश्यकतानुसारम् अग्रे सरेत्।

अध्यापकः कक्षायाः छात्रान् प्रश्नान् प्रष्टुं प्रेरयेत्। छात्राः एकैकं कृत्वा प्रश्नान् पृच्छेयुः। अध्यापकः तेषां प्रश्नान् उत्तरेत्। प्रत्येकमपि छात्रः न्यूनातिन्यूनम् एकं प्रश्नम् अवश्यं पृच्छेत्।

## आकलनप्रश्नः

**अधोलिखितानि प्रश्नवाचकपदानि आधृत्य एकं प्रश्नं तस्य उत्तरं च लिखत—**

किम् ............................................................

कुत्र ............................................................

कदा ............................................................

कुतः ............................................................

कथम् ............................................................

किमर्थम् ............................................................

# 15 उपसर्गाभ्यासः 1

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः उपसर्गाणां परिचयं प्राप्स्यन्ति।
- छात्राः उपसर्गं संयोज्य नूतन-शब्दनिर्माणस्य अभ्यासं करिष्यन्ति।

## विषयावबोधः

अध्यापकः लेखनफलकमाध्यमेन स्फोरकपत्रमाध्यमेन वा उपसर्गाणां परिचयं कारयेत्। धातुभिः शब्दैः च सह उपसर्गान् संयोज्य नूतनशब्दनिर्माणं बोधयेत्। अध्यापकः छात्राणां साहाय्येन उपसर्गाणां धातूनाम् उपसर्गयुक्तशब्दानाञ्च लघु-स्फोरकपत्राणि निर्मापयेत्। उपसर्गाणां संयोजनेन निर्मितस्य शब्दस्य कदाचित् अर्थः परिवर्तते कदाचित् च स एव अर्थः तिष्ठति। एतद् बोधयितुम् अस्य श्लोकस्य प्रयोगः कर्तुं शक्यते —

**उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।**
**प्रहाराहार-संहार-विहार-परिहारवत्॥**

प्र + हारः = प्रहारः
आ + हारः = आहारः
सम् + हारः = संहारः
वि + हारः = विहारः
परि + हारः = परिहारः




## क्रियान्वयनम्

अध्यापकः कक्षायाः सङ्ख्यानुसारं कक्षां विविधगणेषु विभजेत्। सर्वाणि स्फोरकपत्राणि अध्यापकस्य पुरतः उत्पीठिकायां व्यवस्थितरूपेण स्थापितानि भवेयुः। अध्यापकः प्रत्येकमपि गणात् एकैकं छात्रम् आह्वयेत्। छात्रः कमपि एकम् उपसर्गं शब्दं वा स्वीकृत्य नूतनं शब्दं रचयेत्। अनन्तरं स्तरानुसारं छात्रः तस्य शब्दस्य प्रयोगेण एकं लघुवाक्यमपि वदेत्। एवमेव अन्यस्मात् गणात् छात्रः आगच्छेत्, शब्दनिर्माणं कृत्वा वाक्यं च वदेत्। एषा एव प्रक्रिया आवश्यकतानुसारम् अग्रे सरेत्। एषः कार्यकलापः उदाहरणरूपेण प्रदत्तः अस्ति, एतदतिरिच्य अपि अध्यापकः अन्यान् कार्यकलापान् कारयितुं शक्नुयात्।

## आकलनप्रश्नः

**उदाहरणानुसारं रिक्तस्थानानि पूरयत—**

(क) सम् + युक्तः = संयुक्तः

(ख) प्र + युक्तः = ..................................

(ग) अप + सरति = ..................................

(घ) सम् + योगः = ..................................

(ङ.) निस् + सरति = ..................................

(च) दुर् + बलः = ..................................

# 16 उपसर्गाभ्यासः 2

## कार्यकलापस्य उद्देश्यम्

- छात्राः अनेन कार्यकलापेन उपसर्गान् परिचेतुं समर्थाः भविष्यन्ति।
- छात्राः उपसर्गं धातुं च शब्दात् पृथक् कर्तुम् अभ्यासं करिष्यन्ति।

## विषयावबोधः

अध्यापकः उपसर्गयुक्तानां शब्दानां परिचयं कारयेत्। सः उपसर्गयुक्तानां शब्दानां स्फोरकपत्राणि छात्राणां साहाय्येन सिद्धानि कारयेत्। स्फोरकपत्रे उपसर्गः धातुः शब्दः वा स्पष्टतया लिखितः भवेत्।

## क्रियान्वयनम्

अध्यापकः स्फोरकपत्राणि उत्पीठिकायां व्यवस्थितरूपेण स्थापयेत्। इदानीं अध्यापकः छात्रान् क्रमशः पुरतः आह्वयेत्। छात्रः उत्पीठिकायाः एकं स्फोरकपत्रं स्वीकुर्यात्। तत्र लिखिते शब्दे प्रयुक्तम् उपसर्गं श्यामफलके लिखेत्। तम् उपसर्गं प्रयुज्य नूतनशब्दनिर्माणमपि कारयितुं शक्यते। एवमेव अन्ये छात्राः अपि एकैकशः पुरतः आगत्य इमां प्रक्रियाम् अनुसरेयुः। एषः कार्यकलापः सामूहिकरूपेण स्फोरकपत्रं प्रदर्श्य अपि कारयितुं शक्यते। एषः कार्यकलापः उदाहरणरूपेण प्रदत्तः अस्ति, एतदतिरिच्य अपि अध्यापकः अन्यान् कार्यकलापान् कारयितुं शक्नुयात्।

| | | | |
|---|---|---|---|
| प्रत्येकम् | अपसरति | निर्गमनम् | व्याकरणम् |
| संविधानम् | अनुभवति | अतिशयः | सुदर्शनम् |

## आकलनप्रश्नः

**उदाहरणानुसारम् उपसर्गं पृथक् कृत्वा लिखत—**

(क) अवबोधः = अव + बोधः

(ख) पराजयः = ........................ + ........................

(ग) आगच्छति = ........................ + ........................

(घ) दुश्शासनः = ........................ + ........................

(ङ) विशेषः = ........................ + ........................

(च) अत्यधिकम् = ........................ + ........................

(छ) स्वागतम् = ........................ + ........................

(ज) उच्चारणम् = ........................ + ........................

(झ) उपग्रामम् = ........................ + ........................

# साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च – 4

1. मञ्जूषातः उचितं सन्धिपदं स्वीकृत्य सम्बन्धितवर्तुले लिखत—

| | | | | |
|---|---|---|---|---|
| विद्यालयः | वागीशः | रजनीशः | छात्रो गच्छति | गणेशः |
| तथैव | जन्मोत्सवः | अजन्तः | देवश्शक्नोति | चयनम् |
| गुर्वाज्ञा | ममौषधम् | इत्यादिः | रामो राजते | जगदीशः |
| बालष्षष्ठः | सर्पस्सरति | इतस्ततः | षड्वादनम् | एतच्छत्रम् |
| पवनः | चलच्चित्रम् | मृगश्चरति | मण्डूकष्टर्टरायते | कोऽपि। |

| स्वरसन्धियुक्तपदानि | व्यञ्जनसन्धियुक्तपदानि | विसर्गसन्धियुक्तपदानि |
|---|---|---|
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |

**2. प्रदत्त-उदाहरणानुगुणं स्थूलपदम् अधिकृत्य विवेचनं कुरुत—**

| | प्रथमसमूहः (सन्धिविच्छेदः) | द्वितीयसमूहः(सन्धेर्नाम) |
|---|---|---|
| (क) छात्राः **पुस्तकालयं** गच्छन्ति। | पुस्तक + आलयम् | दीर्घसन्धिः |
| (ख) **महेशः** गीतां पठति। | ............... + ............... | ............... |
| (ग) **सूर्योदयः** प्रातःकाले भवति। | ............... + ............... | ............... |
| (घ) **नायकः** अभिनयं करोति। | ............... + ............... | ............... |
| (ङ) **सज्जनः** सद्व्यवहारम् करोति। | ............... + ............... | ............... |
| (च) **तच्चित्रं** बहुसुन्दरम् अस्ति। | ............... + ............... | ............... |
| (छ) **महर्षिः** सद्व्रतं धारयति। | ............... + ............... | ............... |
| (ज) तत्र **कोऽपि** उच्चैः हसति। | ............... + ............... | ............... |

**3. अधोलिखितानि रेखाङ्कितपदानि आधृत्य मञ्जूषातः उचित-अव्ययपदं चित्वा प्रश्ननिर्माणं कुरुत—**

किम्  कुत्र  कदा  कुतः  कथम्  किमर्थम्

- मार्जकः गृहे अस्ति। ⟶ मार्जकः ............... अस्ति?
- माता पुत्रं विद्यालयं प्रेषयति। ⟶ माता पुत्रं ............... प्रेषयति?
- कक्षायां पञ्चाशत् छात्राः सन्ति। ⟶ कक्षायां ............... छात्राः सन्ति?
- रात्रौ दधि न भुञ्जीत। ⟶ ............... दधि न भुञ्जीत?
- अहं प्रातः पञ्चवादने उत्तिष्ठामि। ⟶ अहं ............... पञ्चवादने उत्तिष्ठामि?
- बालः उद्यानतः आगच्छति। ⟶ बालः ............... आगच्छति?

- राधा कार्यालयात् गृहं गच्छति। ⟶ राधा ............... गृहं गच्छति?
- अहं कुशली अस्मि। ⟶ अहं ............... अस्मि?
- देवालयः उन्नतः अस्ति। ⟶ देवालयः ............... अस्ति?
- अहं स्नानार्थं जलं नयामि। ⟶ अहं ............... जलं नयामि?
- शिशुः पानार्थं दुग्धं याचते। ⟶ शिशुः ............... दुग्धं याचते?

**4. अधः एकस्मिन् पट्टे अपरस्मिन् पट्टे च धातुप्रत्यययुक्तपदानि लिखितानि सन्ति। प्रत्येकं पट्टात् एकैकं पदं चित्वा सार्थकपदानां निर्माणं कुरुत—**

प्र, अप, सम्, अनु,
अव, वि, परा, अधि,
अति, प्रति, उप, सु ,
निस्, आ, दुस्

हारः, युक्तः, सरति,
बलः, जयः, शेषः,
आवश्यकः, योगः,
कारः, सारः, भावः

यथा– प्र + योगः = प्रयोगः

(क) ................... + ...................... = .................................
(ख) ................... + ...................... = .................................
(ग) ................... + ...................... = .................................
(घ) ................... + ...................... = .................................
(ङ) ................... + ...................... = .................................
(च) ................... + ...................... = .................................
(छ) ................... + ...................... = .................................
(ज) ................... + ...................... = .................................
(झ) ................... + ...................... = .................................
(ञ) ................... + ...................... = .................................

## कार्यकलापानां मूल्याङ्कनम्

अध्यापक: कार्यकलापस्य क्रियान्वयनानन्तरं मध्ये अन्ते वा कार्यकलापस्य अधिगमस्य परीक्षणार्थं मूल्याकनं कुर्यात्। एतदर्थम् अध्यापकाणां कृते अध: आरेखन् (रुब्रिक्स) प्रदत्तम् अस्ति। एतदद्वारा अध्यापकः छात्राणां अधिगमस्य प्रगतिं सुनिश्चितं करोति। छात्राणाम् अधिगमे न्यूनता अस्ति तर्हि तेभ्य: सहयोगः दद्यात् तथा च सम्यग् अधिगमं प्रदर्शयति चेत् प्रोत्साहनं दद्यात्। रूब्रिक्स इति आरेखे अध्यापक: उत्तमस्य कृते प्रोत्साहनम्, मध्यमस्य कृते अवधानम् तथा च सामान्यस्य कृते सहयोग: दद्यात्। एतत् दायित्वं अध्यापकस्य/अध्यापिकाया: अस्ति।

| कार्यकलाप: | कार्यकलापे सहभागित्वम् | | | कार्यकलापस्य अवबोध: | | | अवबोधस्य प्रयोग: | | |
|---|---|---|---|---|---|---|---|---|---|
| | उत्तम: | मध्यम: | सामान्य: | उत्तम: | मध्यम: | सामान्य: | उत्तम: | मध्यम: | सामान्य: |
| 1 | | | | | | | | | |
| 2 | | | | | | | | | |
| 3 | | | | | | | | | |
| 4 | | | | | | | | | |
| 5 | | | | | | | | | |
| 6 | | | | | | | | | |
| 7 | | | | | | | | | |
| 8 | | | | | | | | | |
| 9 | | | | | | | | | |
| 10 | | | | | | | | | |
| 11 | | | | | | | | | |
| 12 | | | | | | | | | |
| 13 | | | | | | | | | |
| 14 | | | | | | | | | |
| 15 | | | | | | | | | |
| 16 | | | | | | | | | |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 17 | | | | | | | | | |
| 18 | | | | | | | | | |
| 19 | | | | | | | | | |
| 20 | | | | | | | | | |
| 21 | | | | | | | | | |
| 22 | | | | | | | | | |
| 23 | | | | | | | | | |
| 24 | | | | | | | | | |
| 25 | | | | | | | | | |

## परियोजनाकार्यम्

- स्वर-व्यञ्जन-विसर्गसन्धियुक्तपदानाम् अन्वेषणं कृत्वा चार्ट/स्फोरकपत्रनिर्माणं कुरुत।
- भवान्/भवती स्वविद्यालयस्य दिनचर्यायाः वर्णनं पूर्वकार्यकलापेषु चर्चितानि अव्ययपदानि प्रयुज्य कुरुत।

# 17 प्रत्ययः (कृत्-प्रत्ययः)

## कार्यकलापस्य परिचयः

- अनेन कार्यकलापेन छात्राः क्रीडामाध्यमेन कृत्प्रत्ययानां प्रयोगे निपुणाः भविष्यन्ति।
- अत्र कृत्प्रत्ययानाम् अभ्यासः भविष्यति।

## विषयावबोधः

अध्यापकः/अध्यापिका पी.पी.टी. इति माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा कृत्प्रत्यययुक्त-पदानि छात्राणां समक्षम् उपस्थापयति। छात्राणाम् अभ्यासं कारयन् कृत्प्रत्यययुक्तपदं सार्थं बोधयति –

## क्त्वाप्रत्ययस्य वाक्यस्तरे उदाहरणानि

- छात्रः विद्यालयं गच्छति। पाठं पठति। ⟶ छात्रः विद्यालयं गत्वा पाठं पठति।
- सः पाठं पठति। लिखति। ⟶ सः पाठं पठित्वा लिखति।
- सः पाठं लिखति। प्रदर्शयति। ⟶ सः पाठं लिखित्वा प्रदर्शयति।

## क्त्वाप्रत्ययस्य पदस्तरे उदाहरणानि

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| पठति | (पठ् + क्त्वा) | → | पठित्वा | भ्रमति | (भ्रम् + क्त्वा) | → | ...................... |
| लिखति | (लिख् + क्त्वा) | → | लिखित्वा | नयति | (नी + क्त्वा) | → | ...................... |
| गच्छति | (गम् + क्त्वा) | → | गत्वा | स्मरति | (स्मृ + क्त्वा) | → | ...................... |
| पिबति | (पा + क्त्वा) | → | पीत्वा | तिष्ठति | (स्था + क्त्वा) | → | ...................... |
| क्रीडति | (क्रीड् + क्त्वा) | → | क्रीडित्वा | रक्षति | (रक्ष् + क्त्वा) | → | ...................... |
| जानाति | (ज्ञा + क्त्वा) | → | ज्ञात्वा | मिलति | (मिल् + क्त्वा) | → | ...................... |
| शृणोति | (श्रु + क्त्वा) | → | श्रुत्वा | इच्छति | (इष् + क्त्वा) | → | ...................... |
| दद्यात् | (दा + क्त्वा) | → | दत्वा | धावति | (धाव् + क्त्वा) | → | ...................... |
| वदति | (वद् + क्त्वा) | → | उदित्वा | पश्यति | (दृश् + क्त्वा) | → | ...................... |
| करोति | (कृ + क्त्वा) | → | कृत्वा | गायति | (गै + क्त्वा) | → | ...................... |
| खादति | (खाद् + क्त्वा) | → | खादित्वा | नमति | (नम् + क्त्वा) | → | ...................... |

### तुमुन्-प्रत्ययस्य वाक्यस्तरे उदाहरणानि

- छात्रः विद्यालयं गच्छति। पाठं पठति। ⟶ छात्रः पाठं पठितुं विद्यालयं गच्छति।
- सः पाठं पठति। लिखति। ⟶ सः लेखितुं पाठं पठति।
- सः पाठं लिखति। प्रदर्शयति। ⟶ सः पाठं प्रदर्शयितुं पाठं लिखति।

### तुमुन्-प्रत्ययस्य पदस्तरे उदाहरणानि

| | | | | | |
|---|---|---|---|---|---|
| पठति | (पठ् + तुमुन्) → पठितुम् | | भ्रमति | (भ्रम् + तुमुन्) | → ...................... |
| लिखति | (लिख् + तुमुन्) → लेखितुम् | | नयति | (नी + तुमुन्) | → ...................... |
| गच्छति | (गम् + तुमुन्) → गन्तुम् | | स्मरति | (स्मृ + तुमुन्) | → ...................... |
| पिबति | (पा + तुमुन्) → पातुम् | | तिष्ठति | (स्था + तुमुन्) | → ...................... |
| क्रीडति | (क्रीड् + तुमुन्) → क्रीडितुम् | | रक्षति | (रक्ष् + तुमुन्) | → ...................... |
| जानाति | (ज्ञा + तुमुन्) → ज्ञातुम् | | मिलति | (मिल् + तुमुन्) | → ...................... |
| शृणोति | (श्रु + तुमुन्) → श्रोतुम् | | इच्छति | (इष् + तुमुन्) | → ...................... |
| दद्यात् | (दा + तुमुन्) → दातुम् | | धावति | (धाव् + तुमुन्) | → ...................... |
| वदति | (वद् + तुमुन्) → वदितुम् | | पश्यति | (दृश् + तुमुन्) | → ...................... |
| करोति | (कृ + तुमुन्) → कर्तुम् | | गायति | (गै + तुमुन्) | → ...................... |
| खादति | (खाद् + तुमुन्) → खादितुम् | | नमति | (नम् + तुमुन्) | → ...................... |

### ल्यप्-प्रत्ययस्य वाक्यस्तरे उदाहरणानि

- छात्रः विद्यालयम् आगच्छति। पाठं पठति। ⟶ छात्रः विद्यालयं आगम्य पाठं पठति।
- सः पाठं प्रपठति। लिखति। ⟶ सः पाठं प्रपठ्य लिखति।
- सः पाठं विलिखति। प्रदर्शयति। ⟶ सः पाठं विलिख्य प्रदर्शयति।
- छात्रः पाठं प्रदर्शयति । आनन्दम् अनुभवति। ⟶ छात्रः पाठं प्रदर्श्य आनन्दम् अनुभवति।

## ल्यप्-प्रत्ययस्य पदस्तरे उदाहरणानि

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| प्रपठति | (प्र+पठ्+ल्यप्) | → प्रपठ्य | | परिभ्रमति | (परि+भ्रम्+ल्यप्) | → | ...................... |
| विलिखति | (वि+लिख्+ल्यप्) | → विलिख्य | | आनयति | (आ+नी+ल्यप्) | → | ...................... |
| अवगच्छति | (अव+गम्+ल्यप्) | → अवगत्य | | विस्मरति | (वि+स्मृ+ल्यप्) | → | ...................... |
| उत्तिष्ठति | (उत्+स्था+ल्यप्) | → उत्थाय | | उपगच्छति | (उप+गम्+ल्यप्) | → | ...................... |
| विक्रीडति | (वि+क्रीड्+ल्यप्) | → विक्रीड्य | | परिरक्षति | (परि+रक्ष्+ल्यप्) | → | ...................... |
| विजानाति | (वि+ज्ञा+ल्यप्) | → विज्ञाय | | सम्मिलति | (सम्+मिल्+ल्यप्) | → | ...................... |
| प्रक्षालयति | (प्र+क्षाल्+ल्यप्) | → प्रक्षाल्य | | प्रणमति | (प्र+नम्+ल्यप्) | → | ...................... |
| आदद्यात् | (आ+दा+ल्यप्) | → आदाय | | अनुवदति | (अनु+वद्+ल्यप्) | → | ...................... |
| स्वीकरोति | (स्वी+कृ+ल्यप्) | → स्वीकृत्य | | आस्वादयति | (आ+स्वाद्+ल्यप्) | → | ...................... |

## क्रियान्वयनम्

1. अध्यापकः/अध्यापिका पी.पी.टी. इति माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा उपरोक्तविधिना विषयम् उपस्थापयति वाचनं च कारयति। अनेन प्रकारेण अन्य-प्रत्ययपदानाम अपि अभ्यासं कारयेत्। छात्राः तदनुसरेयुः।
2. अध्यापकः/अध्यापिका समूहद्वयं निर्माय एकस्मिन् समूहे कृत्प्रयत्ययुक्तपदानाम् चिटिकाः प्रदद्यात्। अपरस्मिन् समूहे कृत्प्रत्ययरहितपदानाम् चिटिकाः दद्यात्। अधुना एकस्य समूहस्य एकः प्रतिभागी स्वचिटिकां पठति पुनः अपरस्य समूहस्य प्रतिभागी स्वचिटिकां पठति। पुनः समुचितेन कृत्प्रत्ययरहितपदेन/कृत्प्रत्यययुक्तपदेन सह समुचितस्य प्रत्ययरहितपदस्य/प्रत्यययुक्तपदस्य युगलं निर्माति। छात्राः अध्यापकस्य/अध्यापिकायाः वा सूचनायाः अनुपालनं कुर्वन्तः प्रत्ययान् अभ्यसन्ति।
3. अध्यापकः/अध्यापिका उपरोक्तविधिना छात्राणां समूहं निर्माय अनेकेषां कृत्प्रत्यययुक्त-पदानां योजनाबद्धरूपेण अभ्यासं कारयेत्।

उपरोक्ताः क्रियाकलापाः उदाहरणरूपेण दत्ताः सन्ति। अध्यापकः/अध्यापिका स्वव्यवस्थानुसारं विषयोपस्थापनाय चिन्तयितुं शक्नुयात्।

### आकलनप्रश्नः

अध्यापकः/अध्यापिका अनेकेषां कृत्प्रत्यययुक्तपदानां साहाय्येन आकलनं कुर्यात्। तद्यथा

**अधः प्रदत्तेषु वाक्येषु रेखाङ्कितानां पदानां प्रत्ययं पृथक् कृत्वा संयोज्य वा लिखत—**

- छात्रः पुस्तकालयं **गत्वा** पुस्तकं पठति। गम् + क्त्वा = गत्वा
- कोऽपि अत्र **आ+गम्+ल्यप्** सूचनां पठेत्। ..............................
- रामः विशिष्टां चर्चां **श्रोतुं** विदुषां सभां प्रविशति। ..............................
- सर्वे जनन्याः आज्ञां **परिपाल्य** सफलाः भवन्ति। ..............................
- ईश्वरः जगद् **रक्ष्+तुमुन्** अवतरितः भवति। ..............................

# 18 प्रत्ययः (तद्धित-प्रत्ययः)

## कार्यकलापस्य उद्देश्यम्

- छात्राः तद्धितप्रत्ययस्य परिचयं प्राप्स्यन्ति।
- छात्राः तल्, त्व प्रत्यययोः अभ्यासं करिष्यन्ति।

## विषयावबोधः

अध्यापकः/अध्यापिका पी.पी.टी. इति माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा तद्धितप्रत्यययुक्त-पदानि छात्राणां समक्षम् उपस्थापयति। छात्राणाम् अभ्यासं कारयन् प्रत्यययुक्तपदं सार्थं बोधयति –

## तल्प्रत्ययस्य उदाहरणानि

यदि नरेषु मानव + **तल्** न भवेत् तर्हि समाजे सम + **त्व** अपि न भवेत्।

यदि नरेषु मानव**ता** न भवेत् तर्हि समाजे सम**त्वम्** अपि न भवेत्।

| तल् (ता) प्रत्यययुक्तपदानि | | | | |
|---|---|---|---|---|
| देव | + | तल् | = | देवता |
| मधुर | + | तल् | = | मधुरता |
| चपल | + | तल् | = | चपलता |
| सरल | + | तल् | = | सरलता |
| निपुण | + | तल् | = | निपुणता |

| त्व (त्वम्) प्रत्यययुक्तपदानि | | | | |
|---|---|---|---|---|
| देव | + | त्व | = | देवत्वम् |
| मधुर | + | त्व | = | मधुरत्वम् |
| चपल | + | त्व | = | चपलत्वम् |
| सरल | + | त्व | = | सरलत्वम् |
| निपुण | + | त्व | = | निपुणत्वम् |

**अधः प्रदत्तानि तल्, त्व, इति प्रत्यययुक्तपदानि पदानि समुचिते स्थाने स्थापयत—**

| | | | | |
|---|---|---|---|---|
| सामाजिकता | सामाजिकत्वम् | गूढता | वैज्ञानिकत्वम् | नैतिकता |
| समत्वम् | एकता | धृष्टता | कवित्वम् | कटुता |
| गुरुत्वम् | लघुता | ऋजुत्वम् | पशुता | साधुता |
| मातृत्वम् | विद्वत्ता | नृपत्वम् | भ्रातृत्वम् | |

| तल् (ता) प्रत्यययुक्तपदानि | त्व (त्वम्) प्रत्यययुक्तपदानि |
|---|---|
| सामाजिकता | भ्रातृत्वम् |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |

............................... ...............................

............................... ...............................

............................... ...............................

............................... ...............................

............................... ...............................

## क्रियान्वयनम्

1. अध्यापकः/अध्यापिका पी.पी.टी. माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा उपरोक्तविधिना विषयम् उपस्थापयति वाचनं च कारयति। अनेन प्रकारेण तद्धितप्रत्ययपदानाम् अभ्यासं कारयेत्। छात्राः तदनुसरेयुः।
2. अध्यापकः/अध्यापिका समूहद्वयं निर्माय एकस्मिन् समूहे तद्धितप्रत्यययुक्तपदानां चिटिकाः प्रदद्यात्। अपरस्मिन् समूहे तद्धितप्रत्ययरहितपदानां चिटिकाः दद्यात्। पश्चात् छात्रान् सूचयेत्- भोः छात्राः! भवतां समूहे चिटिकाः सन्ति। अधुना एकस्य समूहस्य एकः प्रतिभागी स्वचिटिकां पठेत्। पुनः अपरस्य समूहस्य प्रतिभागी स्वचिटिकां पठेत्। पुनः समुचितेन प्रत्ययरहितपदेन/प्रत्यययुक्तपदेन सह समुचितस्य प्रत्ययरहितपदस्य/प्रत्यययुक्तपदस्य युगलं निर्मायात्। छात्राः अध्यापकस्य/अध्यापिकायाः वा सूचनायाः अनुपालनं कुर्वन्तः प्रत्ययान् अभ्यसेयुः।
3. अध्यापकः/अध्यापिका उपरोक्तविधिना छात्राणां समूहं निर्माय अनेकेषां प्रत्यययुक्त-पदानां योजनाबद्धरूपेण अभ्यासं कारयेत्।

उपरोक्ताः क्रियाकलापाः उदाहरणरूपेण दत्ताः सन्ति। अध्यापकः/अध्यापिका स्वव्यवस्थानुसारं विषयोपस्थापनाय चिन्तयितुं शक्नुयात्।

## आकलनप्रश्नः

अध्यापकः/अध्यापिका अनेकेषां प्रत्यययुक्तपदानां साहाय्येन आकलनं कुर्यात्।

**अधः प्रदत्तेषु वाक्येषु रेखाङ्कितानां पदानां प्रत्ययं पृथक् कृत्वा संयोज्य वा लिखत—**

(क) मातुः मातृ + त्व जगति प्रथितम्। **मातृत्व**

(ख) देवानां देव + त्व सर्वोपकारकम्। ...............................................

(ग) सर्वेषु साधुता आवश्यकी अस्ति। ...............................................

(घ) अहं भारतजनता अस्मि। ...............................................

(ङ) नृपस्य नृपत्वं स्वराज्ये एव भवति। ...............................................

(च) विदुषः विद्वत्ता सर्वत्र फलीभूता भवति। ...............................................

# 19 प्रत्ययः (स्त्री-प्रत्ययः)

## कार्यकलापस्य उद्देश्यम्

- छात्राः स्त्रीप्रत्ययस्य परिचयं प्राप्स्यन्ति।
- छात्राः टाप्, ङीप् प्रत्यययोः अभ्यासं करिष्यन्ति।

## विषयावबोधः

अध्यापकः/अध्यापिका पी.पी.टी. इति माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा स्त्रीप्रत्यययुक्त-पदानि छात्राणां समक्षम् उपस्थापयति। छात्राणाम् अभ्यासं कारयन् प्रत्यययुक्तपदं सार्थं बोधयति –

## टाप्, ङीप् प्रत्यययोः उदाहरणानि

तत्र क्षेत्रे **अज** + **टाप्** चरति। ⟶ तत्र क्षेत्रे **अजा** चरति।

**भवत्** + **ङीप्** लेखनकार्यं समापयतु। ⟶ **भवती** लेखनकार्यं समापयतु।

| टाप् (आ) प्रत्यययुक्तपदानि | | | | |
|---|---|---|---|---|
| एक | + | टाप् | = | एका |
| अश्व | + | टाप् | = | अश्वा |
| श्वेत | + | टाप् | = | श्वेता |
| शिव | + | टाप् | = | शिवा |
| पाचक | + | टाप् | = | पाचिका |
| सेवक | + | टाप् | = | सेविका |

| ङीप् (ई) प्रत्यययुक्तपदानि | | | | |
|---|---|---|---|---|
| देव | + | ङीप् | = | देवी |
| गौर | + | ङीप् | = | गौरी |
| व्याघ्र | + | ङीप् | = | व्याघ्री |
| कर्तृ | + | ङीप् | = | कर्त्री |
| बुद्धिमत् | + | ङीप् | = | बुद्धिमती |
| अधिकारिन् | + | ङीप् | = | अधिकारिणी |

## अधः प्रदत्तानि पदानि समुचिते स्थाने स्थापयत

| | | | | | | |
|---|---|---|---|---|---|---|
| चपला | गुणिनी | निपुणा | मनोहारिणी | सरला | धात्री | याचिका |
| श्रीमती | चटका | नर्तकी | कृशा | व्याघ्री | मलिना | कुमारी |
| नाटिका | सुन्दरी | दिव्या | साध्वी | वर्तमाना | जाह्नवी | चतुरा |
| पट्वी | अजा | मातामही | कोकिला | द्रोणी | नायिका | बलवती |

| टाप् (आ) प्रत्यययुक्तपदानि | ङीप् (ई) प्रत्यययुक्तपदानि |
|---|---|
| निपुणा | सुन्दरी |
| .............................. | .............................. |
| .............................. | .............................. |

| | |
|---|---|
| ............................... | ............................... |
| ............................... | ............................... |
| ............................... | ............................... |
| ............................... | ............................... |
| ............................... | ............................... |
| ............................... | ............................... |
| ............................... | ............................... |
| ............................... | ............................... |
| ............................... | ............................... |
| ............................... | ............................... |
| ............................... | ............................... |
| ............................... | ............................... |

## क्रियान्वयनम्

1. अध्यापकः/अध्यापिका पी.पी.टी. इति माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा उपरोक्तविधिना विषयम् उपस्थापयति वाचनं च कारयति। अनेन प्रकारेण स्त्रीप्रत्ययपदानाम् अभ्यासं कारयेत्। छात्राः तदनुसरेयुः।
2. अध्यापकः/अध्यापिका समूहद्वयं निर्माय एकस्मिन् समूहे स्त्रीप्रत्यययुक्तपदानां चिटिकाः प्रदद्यात्। अपरस्मिन् समूहे स्त्रीप्रत्ययरहितपदानां चिटिकाः दद्यात्। पश्चात् छात्रान् सूचयति— भोः छात्राः! भवतां समूहे चिटिकाः सन्ति। अधुना एकस्य समूहस्य एकः प्रतिभागी स्वचिटिकां पठेत्। पुनः अपरस्य समूहस्य प्रतिभागी स्वचिटिकां पठेत्। पुनः समुचितेन प्रत्ययरहितपदेन/प्रत्यययुक्तपदेन सह समुचितस्य प्रत्ययरहितपदस्य/प्रत्यययुक्तपदस्य युगलं निर्मायात्। छात्राः अध्यापकस्य/अध्यापिकायाः वा सूचनायाः अनुपालनं कुर्वन्तः प्रत्ययान् अभ्यसेयुः।
3. अध्यापकः/अध्यापिका उपरोक्तविधिना छात्राणां समूहं निर्माय अनेकेषां प्रत्यययुक्त-पदानां योजनाबद्धरूपेण अभ्यासं कारयेत्।

उपरोक्ताः क्रियाकलापाः उदाहरणरूपेण दत्ताः सन्ति। अध्यापकः/अध्यापिका स्वव्यवस्थानुसारं विषयोपस्थापनाय चिन्तयितुं शक्नुयात्।

## आकलनप्रश्नः

अध्यापकः/अध्यापिका अनेकेषां स्त्रीप्रत्यययुक्तपदानां साहाय्येन आकलनं कुर्यात्।

**अधः प्रदत्तेषु वाक्येषु रेखाङ्कितानां पदानां प्रत्ययं पृथक् कृत्वा संयोज्य वा लिखत—**

(क) **मातामही** प्रतिदिनं प्रातः काले उद्यानं भ्रमणाय गच्छति। **मातामह + ङीप्**

(ख) सर्वे ज्ञानार्थं **देव + ङीप्** सरस्वतीं नमन्ति। ..............................................

(ग) **आचार्या** सर्वान् छात्रान् पाठयति। ..............................................

(घ) राघवस्य **अग्रज + टाप्** वाराणस्यां निवसति। ..............................................

(ङ) लक्ष्मीबाई **वीरा** आसीत्। ..............................................

# 20 सङ्ख्यापदानाम् अभ्यासः

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः एकतः शतपर्यन्तं सङ्ख्यानां परिचयं प्राप्स्यन्ति।
- अनेन कार्यकलापेन छात्राः एकतः शतपर्यन्तं सङ्ख्यानाम् उच्चारणे लेखने च समर्थाः भविष्यन्ति।

## विषयावबोधः

अध्यापकः लेखनफलकमाध्यमेन स्फोरकपत्रमाध्यमेन (चार्ट) वा एकतः शतपर्यन्तं सङ्ख्यानां वाचनं कारयेत्। अध्यापकः सङ्ख्यापद-चिटिकानां निर्माणं छात्राणां साहाय्येन कुर्यात्। चिटिकायाः एकस्मिन् भागे अङ्केषु अपरस्मिन् भागे च शब्देषु सङ्ख्या लिखिता भवेत्। अनेन क्रमेण एकतः शतपर्यन्तं सङ्ख्याः लिखिताः भवेयुः। (शतं चिटिकाः)

## क्रियान्वयनम्

एषः कार्यकलापः समूहेषु कारयिष्यते। अध्यापकः सम्पूर्णकक्षायाः पञ्चसमूहेषु विभाजनं कुर्यात्। प्रत्येकं समूहाय अक्रमेण मिश्रिताः विंशति-चिटिकाः प्रदेयाः। प्रत्येकं समूहः परस्परं मिलित्वा सङ्ख्याचिटिकाः क्रमानुसारं व्यवस्थापयेत् पुनः क्रमनिरीक्षणं कृत्वा अध्यापकं सूचयेत्। आवश्यकतायां सत्यां अध्यापकः अपेक्षितं संशोधनं छात्राणां साहाय्येन कारयेत्। तत्पश्चात् अध्यापकः तेनैव क्रमेण प्रत्येकं समूहाय भिन्नाः मिश्रिताः चिटिकाः दद्यात्। अनेन क्रमेण प्रत्येकमपि समूहः एकतः शतपर्यन्तं सङ्ख्यानां चिटिकाः क्रमेण स्थापयेत्, पुनः क्रमनिरीक्षणं कृत्वा अध्यापकं सूचयेत्। समूहे सर्वे छात्राः अस्मिन् कार्यकलापे सक्रियाः भवेयुः।

उपरोक्ताः क्रियाकलापाः उदाहरणरूपेण दत्ताः सन्ति। अध्यापकः/अध्यापिका स्वव्यवस्थानुसारं विषयोपस्थापनाय चिन्तयितुं शक्नुयात्।

## आकलनप्रश्नः

**1. एतेषाम् अङ्कानां कृते सङ्ख्यापदं लिखत—**

24 | 38 | 17 | 56 | 42 | 88

**2. समुचितं मेलनं कुरुत—**

| क | ख |
|---|---|
| 18 | चतुःपञ्चाशत् |
| 27 | षट्सप्ततिः |
| 54 | अष्टादश |
| 76 | त्रिनवतिः |
| 93 | सप्तविंशतिः |

# साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च – 5

**1. अधः प्रदत्त-उदाहरणानुसारं प्रत्ययं योजयित्वा पदानि लिखत—**

| गच्छति | गत्वा (क्त्वा) | गन्तुम् (तुमुन्) |
|---|---|---|
| (क) पठति | .................. | .................. |
| (ख) लिखति | .................. | .................. |
| (ग) धावति | .................. | .................. |
| (घ) खादति | .................. | .................. |
| (ङ) पिबति | .................. | .................. |
| (च) नमति | .................. | .................. |
| (छ) नयति | .................. | .................. |
| (ज) जानाति | .................. | .................. |
| (झ) स्मरति | .................. | .................. |

**2. कथां पठित्वा उदाहरणानुसारम् उत्तरत—**

## सिंहः मूषकश्च कथा

एकस्य वृक्षस्य अधः एकः सिंहः शयनं करोति स्म। अकस्मात् कश्चन मूषकः स्वबिलात् बहिः आगत्य सिंहस्य उपरि कूर्दनम् आरब्धवान्। अनेन सिंहस्य निद्रा भग्ना जाता। भङ्गनिद्रया कुपितः सिंहः मूषकं हन्तुम् इष्टवान्। भीतः मूषकः प्राणरक्षार्थं बहुधा प्रार्थितवान्। मूषकः अवदत्— "मां त्यजतु अहं कदाचित् भवतः सहायको भविष्यामि"। इति श्रुत्वा सिंहः उच्चैः विहस्य मूषकम् अमुञ्चत्। एकस्मिन् दिवसे केनचित्

व्याधेन प्रसारितजाले सिंहः बद्धः जातः। जाले बद्धस्य सिंहस्य गर्जनां श्रुत्वा मूषकः तत्र आगतवान्। मूषकः तीक्ष्णदन्तैः जालं कर्तयित्वा सिंहम् अमुञ्चत्।

| पदम् | धातुः | प्रत्ययः |
|---|---|---|
| आगत्य | आ + गम् | ल्यप् |
| .................... | .................. | ..................... |
| .................... | .................. | ..................... |
| .................... | .................. | ..................... |
| .................... | .................. | ..................... |

**3. रिक्तस्थानानि पूरयत—**

| तल् (ता) प्रत्यययुक्तपदानि | | | | |
|---|---|---|---|---|
| मृदु | + | तल् | = | .............. |
| जड | + | तल् | = | .............. |
| चपल | + | तल् | = | .............. |
| कटु | + | तल् | = | .............. |
| ऋजु | + | तल् | = | .............. |

| त्व (त्वम्) प्रत्यययुक्तपदानि | | | | |
|---|---|---|---|---|
| ज्येष्ठ | + | त्व | = | .............. |
| महत् | + | त्व | = | .............. |
| लघु | + | त्व | = | .............. |
| कवि | + | त्व | = | .............. |
| गुरु | + | त्व | = | .............. |

**4. चित्राणां गणनां कृत्वा उचितसङ्ख्यापदं लिखत—**

(क)  ......................

(ख)  ......................

(ग)  ......................

(घ)  ......................

(ङ)  ......................

## कार्यकलापानां मूल्याङ्कनम्

अध्यापक: कार्यकलापस्य क्रियान्वयनानन्तरं मध्ये अन्ते वा कार्यकलापस्य अधिगमस्य परीक्षणार्थं मूल्याकनं कुर्यात्। एतदर्थम् अध्यापकाणां कृते अध: आरेखन् (रुब्रिक्स) प्रदत्तम् अस्ति। एतदद्वारा अध्यापकः छात्राणां अधिगमस्य प्रगतिं सुनिश्चितं करोति। छात्राणाम् अधिगमे न्यूनता अस्ति तर्हि तेभ्य: सहयोगः दद्यात् तथा च सम्यग् अधिगमं प्रदर्शयति चेत् प्रोत्साहनं दद्यात्। रूब्रिक्स इति आरेखे अध्यापक: उत्तमस्य कृते प्रोत्साहनम्, मध्यमस्य कृते अवधानम् तथा च सामान्यस्य कृते सहयोग: दद्यात्। एतत् दायित्वं अध्यापकस्य/अध्यापिकाया: अस्ति।

| कार्यकलाप: | कार्यकलापे सहभागित्वम् | | | कार्यकलापस्य अवबोध: | | | अवबोधस्य प्रयोग: | | |
|---|---|---|---|---|---|---|---|---|---|
| | उत्तम: | मध्यम: | सामान्य: | उत्तम: | मध्यम: | सामान्य: | उत्तम: | मध्यम: | सामान्य: |
| 1 | | | | | | | | | |
| 2 | | | | | | | | | |
| 3 | | | | | | | | | |
| 4 | | | | | | | | | |
| 5 | | | | | | | | | |
| 6 | | | | | | | | | |
| 7 | | | | | | | | | |
| 8 | | | | | | | | | |
| 9 | | | | | | | | | |
| 10 | | | | | | | | | |
| 11 | | | | | | | | | |
| 12 | | | | | | | | | |
| 13 | | | | | | | | | |
| 14 | | | | | | | | | |
| 15 | | | | | | | | | |
| 16 | | | | | | | | | |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 17 | | | | | | | | | |
| 18 | | | | | | | | | |
| 19 | | | | | | | | | |
| 20 | | | | | | | | | |
| 21 | | | | | | | | | |
| 22 | | | | | | | | | |
| 23 | | | | | | | | | |
| 24 | | | | | | | | | |
| 25 | | | | | | | | | |

## परियोजनाकार्यम्

- चित्रं दृष्ट्वा प्रत्ययुक्तपदानि प्रयुज्य लघुकथां लिखत।



- एकतः पञ्चाशत् पर्यन्तं सङ्ख्यापदानि स्फोरकपत्रे लिखत।

# 21 समयः

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापमाध्यमेन छात्राः कालावबोधनं करिष्यन्ति।
- अनेन कार्यकलापमाध्यमेन छात्राः समयवाचिशब्दानाम् अभ्यासं करिष्यन्ति।

## विषयावबोधः

अध्यापकः आदौ कक्षायां स्थूलपत्रेण घटीनिर्माणं कारयति अथवा काञ्चित् पुरातनीं भित्तिघटीं शिक्षणोपकरणत्वेन स्वीकुर्यात्। सः घट्याः समयपरिवर्तनं कृत्वा विभिन्नान् प्रश्नान् कृत्वा छात्राणाम् समयाभ्यासं कारयेत्।

## क्रियान्वयनम्

अध्यापकः घट्या कक्षायां समयस्य पाठनं करोति। सः आदौ क्रमेण एकवादनम्, द्विवादनम्, त्रिवादनम्, चतुर्वादनम्, पञ्चवादनम्, षड्वादनम्, सप्तवादनम्, अष्टवादनम्, नववादनम्, दशवादनम्, एकादशवादनम्, द्वादशवादनम् इति पाठयेत् प्रश्नं च पृच्छेत् यथा कः समयः? सहैव छात्राः अपि उत्तररूपेण उच्चारणं कुर्युः। अनन्तरं अध्यापकः घट्याः समयं परिवृत्य छात्रान् कः समयः? इति प्रश्नं पृच्छेत्। यथा सर्वेषां छात्राणां क्रमः आगच्छेत् तथा अध्यापकस्य प्रयत्नः भवेत्। ततः सः सपाद-एकवादनतः सपाद-द्वादशवादनं यावत् पाठयित्वा मिश्रिताभ्यासं कारयेत्। अनेन एव क्रमेण अध्यापकः सार्ध-पादोन इत्येतौ अंशौ आधृत्य अपि समयस्य पाठनम् अभ्यासं मूल्याङ्कनं च कुर्यात्। यदा छात्राः अभ्यस्ताः भवेयुः तदा छात्राणां युगलगणान् रचयेत्। तयोः संवादं कारयितुं कांश्चन प्रश्नान् श्यामपट्टमाध्यमेन अथवा स्मार्ट्बोर्ड् माध्यमेन प्रदर्शयेत्। यथा– भवान्/भवती कदा कदा क्रीडति? भवतः/भवत्याः पिता कदा कार्यालयात्, गृहम् आगच्छति? भवान्/भवती योगाभ्यासं कदा करोति? भवान्/भवती गृहकार्यं कदा करोति? एवमेव अन्यप्रश्नान् प्रदर्श्य संवादं कारयेत्।



## आकलनप्रश्नः

**उचितसमयवाचकपदैः रिक्तस्थानपूर्तिं करोतु—**

(क) बालः ............. वादने क्रीडति। (4:00)

(ख) पिता प्रातः ............. वादने कार्यालयं गच्छति। (9:00)

(ग) मध्याह्ने ............. वादने विद्यालयस्य अवकाशः भवति। (2:30)

(घ) अहं सायं ............. वादने क्रीडनाय गच्छामि। (7:00)

(ङ) शीतकाले सायं ............. वादने एव अन्धकारः प्रसृतः भवति। (5:45)

# 22 विशेषण-विशेष्यम्

## कार्यकलापस्य उद्देश्यम्

- छात्राः विशेषणविशेष्ययोः परिचयं प्राप्स्यन्ति।
- छात्राः विशेषणविशेष्ययोः अभ्यासं करिष्यन्ति।

## विषयावबोधः

अध्यापकः/अध्यापिका पी.पी.टी. इति माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा विशेषण-विशेष्ययोः त्रिषु लिङ्गेषु सम्बन्धं बोधयेत्। पश्चात् छात्रैः सामूहिकं वाचनं कारयेत्—




## क्रियान्वयनम्




1. अध्यापकः/अध्यापिका पी.पी.टी. इति माध्यमेन स्फोरकपत्रमाध्यमेन (चार्टपत्रकं) वा विषयम् उपस्थापयेत् वाचनं च कारयेत्— बालः। उत्तमः बालः। कीदृशः बालः? छात्राः अध्यापकम् अनुसरन्तः उत्तमः बालः इति वदेयुः। अनेन प्रकारेण विविध-विशेषण-पदानाम् अभ्यासं कारयेत्।
2. अध्यापकः/अध्यापिका समूहद्वयं निर्माय एकस्मिन् समूहे विशेष्यपदानां चिटिकाः प्रदद्यात्। अपरस्मिन् समूहे विशेषणपदानां चिटिकाः दद्यात्। अधुना एकस्य समूहस्य एकः प्रतिभागी स्वचिटिकां पठेत्, पुनः अपरस्य समूहस्य प्रतिभागी स्वचिटिकां पठेत्। पुनः समुचितेन विशेषणेन सह समुचितस्य विशेष्यस्य युगलं निर्मायात्। छात्राः अध्यापकस्य/अध्यापिकायाः वा सूचनायाः अनुपालनं कुर्युः।
3. अध्यापकः/अध्यापिका उपरोक्तविधिना छात्राणां समूहं निर्माय वचनानुसारं योजनां कृत्वा अभ्यासं कारयेत्।

उपरोक्ताः क्रियाकलापाः उदाहरणरूपेण दत्ताः सन्ति। अध्यापकः/अध्यापिका स्वव्यवस्थानुसारं विषयोपस्थापनाय चिन्तयितुं शक्नुयात्।

## आकलनप्रश्नः

(क) ........................ छात्राः कक्षायां सन्ति। (उत्तम)

(ख) ........................ अध्यापकः अध्यापयति। (निपुण)

(ग) छात्राः ........................ घटनां चर्चयन्ति। (विशिष्ट)

(घ) चर्चायां ........................ छात्राः सहभागं स्वीकुर्वन्ति। (सर्व)

(ङ) ........................ कौचन छात्रौ वार्तां कुरुतः। (चतुर)

# 23 समासः 1

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राः समासस्य सामान्यज्ञानं प्राप्स्यन्ति।
- छात्राः विग्रहवाक्यानां समस्तपदं समस्तपदानां च विग्रहवाक्यनिर्माणस्य प्रक्रियां ज्ञास्यन्ति।

## विषयावबोधः

अध्यापकः अधोलिखितानि समस्तपदानि विग्रहवाक्यानि च लेखनफलके लिखेत्, स्फोरकपत्र-माध्यमेन पी.पी.टी. माध्यमेन वा छात्राणां पुरतः स्थापयेत्—

| **समस्तपदम्** | **विग्रहवाक्यम्** |
|---|---|
| यज्ञशाला | यज्ञाय शाला |
| धर्मार्थकाममोक्षाः | धर्मः च अर्थः च कामः च मोक्षः च |
| रामपुत्रः | रामस्य पुत्रः |
| मातापुत्रौ | माता च पुत्रः च |

छात्राः समस्तपदस्य विग्रहवाक्यस्य च उच्चारणं कुर्युः। अधुना अध्यापकः बोधयेत् यत् अनेकेषां पदानाम् एकपदीकरणम् (संक्षिप्तीकरणम्) एव समासः भवति। समासेन वाक्यस्य अर्थपरिवर्तनं न भवति अपितु स्वरूपपरिवर्तनं भवति। अध्यापकः छात्राणां साहाय्येन केषाञ्चन समस्तपदानां तेषां विग्रहवाक्यानां च चिटिकानां निर्माणं कारयेत्।

## क्रियान्वयनम्

अध्यापकः कक्षायाः उपस्थितेः अनुसारं समान-सङ्ख्याकानां समूहानां निर्माणं कुर्यात्। प्रत्येकमपि समूहाय षट् सप्त वा समस्तपदानां विग्रहवाक्यानां च चिटिकाः अव्यवस्थितरूपेण प्रदद्यात्। अधुना प्रत्येकमपि गणः समस्तपदानां चिटिकानां पुरतः तेषां विग्रहवाक्यानां चिटिकाः व्यवस्थाप्य अध्यापकं च सूचयेत्। यदि गणस्य व्यवस्थापने संशोधनस्य आवश्यकता स्यात् तर्हि अध्यापकः सहयोग संशोधनं च कारयेत्। इदानीम् एकेन गणेन प्रयुक्ताः चिटिकाः अन्यगणेन प्रयोक्तव्याः। अनेन प्रकारेण एषा प्रक्रिया तावत् प्रचलेत् यावत् सर्वाः चिटिकाः सर्वेषु गणेषु प्रयुक्ताः न भवेयुः।

दशरथस्य नन्दनः

वृक्षात् पतितः

मानवेन निर्मितम्

लक्ष्म्याः नाथः

| | |
|---|---|
| लवः च कुशः च | युद्धस्य भूमिः |
| यशोदायाः सुतः | देव्याः कृपा |
| दशरथनन्दनः | वृक्षपतितः |
| मानवनिर्मितम् | लक्ष्मीनाथः |
| लवकुशौ | युद्धभूमिः |
| यशोदासुतः | देवीकृपा |

## आकलनप्रश्नः

**प्रदत्तायाः मञ्जूषायाः समस्तपदानि विग्रहवाक्यानि च चित्वा समुचिते स्थाने लिखत—**

| | | | | |
|---|---|---|---|---|
| रामस्य पुत्रः | हस्तलिखितः | वृक्षपतितः | मातापितरौ | पिता च पुत्रः च |
| दशरथनन्दनम् | सीतापतिः | वृक्षात् पतितः | लक्ष्म्याः नाथः | हस्तेन लिखितः |
| पितापुत्रौ | ग्रामगतः | सीतायाः पतिः | रामपुत्रः | लक्ष्मीनाथः |
| ग्रामं गतः | माता च पिता च | दशरथस्य नन्दनम् | | |

| समस्त पदानि | विग्रहवाक्यानि |
|---|---|
| रामपुत्रः | रामस्य पुत्रः |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |
| .............................. | .............................. |

# 24 समासः 2

## कार्यकलापस्य उद्देश्यम्

- छात्राः विग्रहवाक्यानां समस्तपदनिर्माणस्य अभ्यासं करिष्यन्ति।
- छात्राः समस्तपदानां विग्रहस्य अभ्यासं करिष्यन्ति।

## विषयावबोधः

अध्यापकः छात्राणां साहाय्येन विंशतिः त्रिंशत् वा समस्तपदानां तेषां विग्रहवाक्यानां च चिटिकानिर्माणं कुर्यात्। अध्यापकः प्रारम्भे विभक्तितत्पुरुषसमासस्य द्वन्द्वसमासस्य च प्रयोगं कारयेत्।

## क्रियान्वयनम्

कार्यकलापस्य आरम्भे सर्वाः चिटिकाः अध्यापकस्य उत्पीठिकायां भवेयुः। अध्यापकः एकैकां चिटिकां प्रत्येकमपि छात्राय दद्यात्। अधुना प्रत्येकं छात्रः क्रमेण चिटिकायां लिखितं समस्तपदं विग्रहवाक्यं वा उच्चारयेत्। छात्रेण उच्चारितस्य समस्तपदसम्बद्धा विग्रहवाक्यसम्बद्धा वा चिटिका यस्य छात्रस्य समीपे भवेत् सः तत्कालम् उत्थाय चिटिकायां लिखितं समस्तपदं विग्रहवाक्यं वा वदेत्। अनेन विधिना अन्ये अपि छात्राः इमामेव प्रक्रियाम् अनुसरेयुः।

| | |
|---|---|
| राजपुत्रः | नदीतीरे |
| पाकशाला | श्रीकृष्णार्जुनौ |
| ग्रामप्रमुखः | सीतारामौ |
| अहर्निशम् | असत्यम् |

एषः कार्यकलापः उदाहरणरूपेण प्रदत्तः अस्ति, एतदतिरिच्य अपि अध्यापकः अन्यान् कार्यकलापन् कारयितुं शक्नोति।

| | |
|---|---|
| अहः च निशा च | सीता च रामः च |
| पाकाय शाला | ग्रामस्य प्रमुखः |
| श्रीकृष्णः च अर्जुनः च | नद्याः तीरे |
| राज्ञः पुत्रः | न सत्यम् |

### विग्रहवाक्यानि च मेलयत

| **समस्तपदानि** | **विग्रहवाक्यानि** |
|---|---|
| भिक्षाटनम् | उद्यमेन समः |
| शरीराङ्गानि | गुरुः च शिष्यः च |
| उद्यमसमः | सङ्ख्यानां गणना |
| दशरथसुतः | भिक्षायै अटनम् |
| गुरुशिष्यौ | पुत्री च पुत्रः च |
| रामलक्ष्मणसीताः | शरीरस्य अङ्गानि |
| पुत्रीपुत्रौ | दशरथस्य सुतः |
| सङ्ख्यागणना | रामः च लक्ष्मणः च सीता च |

# 25 लघुकथायां रिक्तस्थानपूर्तिः

## कार्यकलापस्य उद्देश्यम्

- अनेन कार्यकलापेन छात्राणां पठनाभ्यासः भविष्यति।
- छात्राः कथां पठित्वा रिक्तस्थानपूर्तेः अभ्यासं करिष्यन्ति।

## विषयावबोधः

अध्यापकः स्फोरकपत्रमाध्यमेन पी.पी.टी. इति माध्यमेन लेखनफलकमाध्यमेन वा एकां चित्रसहितां लघुकथां उपस्थापयेत्। कथायां रिक्तस्थानानि भवेयुः। अध्यापकः रिक्तस्थानानां पूर्तये एकां मञ्जूषाम् अपि प्रदद्यात्। इदानीं अध्यापकः छात्रान् निर्दिशेत् यत् चित्रं ध्यानेन दृष्ट्वा मञ्जूषायां प्रदत्त-पदानां साहाय्येन लघुकथायां रिक्तस्थानपूर्तिं कुरुत। छात्राः स्वबोधानुगुणं रिक्तस्थानपूर्तिं कुर्युः। तदनु अध्यापकः छात्रैः सह चर्चां कुर्वन् कथां स्पष्टीकुर्यात्।



**मञ्जूषा** पलायितवान् चिन्तयति कूर्दितवान् अकरोत् प्राप्तवान् भ्रमति

एकदा एकः शृगालः भोजनम् अन्वेष्टुं वने (क) .............. स्म। सः अतीव क्षुधाम् अनुभवति स्म। सः भोजनं प्राप्तुं प्रयत्नम् (ख) ..............। सः कालान्तरे एकम् उद्यानं (ग) ..............। ततः सः भोजनम् अन्विषन् किञ्चित्दूरं गतवान्। तत्र द्राक्षागुच्छं दृष्ट्वा (घ).............. यत् मधुराणि द्राक्षाफलानि सन्ति। तानि फलानि दृष्ट्वा शृगालस्य मुखं सिञ्चितम्। अतः सः तानि द्राक्षाफलानि प्राप्तुं पुनः पुनः (ङ) .............. परन्तु असफलः जातः। पुनः पुनः प्रयत्नेन श्रान्तः सः द्राक्षाफलानि आम्लानि इति कथयन् (च) ..............।

## क्रियान्वयनम्

अध्यापकः पी.पी.टी इति माध्यमेन लेखनफलक/स्फोरकपत्र-माध्यमेन एकां चित्रसहितां कथां छात्राणां पुरतः उपस्थापयेत्। कथायां रिक्तस्थानानि पूरयितुं मञ्जूषायां पदानि अपि अध्यापकः प्रदद्यात्। इदानीं अध्यापकः कक्षायाः छात्रान् समानसङ्ख्यानुसारं त्रिषु चतुर्षु वा समूहेषु विभजेत्। छात्राः समूहानुसारं कथाम् अवगत्य रिक्तस्थानानि पूरयितुं प्रयासं कुर्युः। इदानीं अध्यापकः समूहानुसारम् एकैकं कृत्वा उत्तरं पृच्छेत्, समुचिते उत्तरे उक्ते सति समूहाय अङ्कमपि प्रयच्छेत्। सर्वेषां रिक्तस्थानानां पूर्तेः अनन्तरं यस्य समूहस्य अधिकाः अङ्काः भवेयुः, सः समूहः विजेता इति उद्घोषयेत्।

## आकलनप्रश्नः

**चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त-पदानां साहाय्येन कथायां रिक्तस्थानपूर्तिं कुरुत—**

सिंहम्   प्रार्थितवान्   गर्जनाम्   निद्रा   अहम्   अमुञ्चत्   सिंहः   मूषकः

एकस्य वृक्षस्य अधः एकः (क) ............... शयनं करोति स्म। तदा कश्चन (ख) ............... स्वबिलात् बहिः आगत्य सिंहस्य उपरि कूर्दनम् आरब्धवान्। अनेन सिंहस्य (ग) ............... भग्ना जाता। भग्ननिद्रया कुपितः सिंहः मूषकं हन्तुम् इष्टवान्। भीतः मूषकः प्राणरक्षार्थं बहुधा (घ) ...............। मूषकः वदति "मां त्यजतु (ङ) ............... कदाचित् भवतः सहायको भविष्यामि"। इति श्रुत्वा सिंहः उच्चैः विहस्य मूषकं (च) ...............। एकस्मिन् दिवसे केनचित् व्याधेन प्रसारितजाले सिंहः बद्धः जातः। जाले बद्धस्य सिंहस्य (छ) ............... श्रुत्वा मूषकः तत्र आगतवान्। मूषकः तीक्ष्णदन्तैः जालं कर्तयित्वा (ज) ............... मुक्तवान्।



॥ इति॥

# साप्ताहिकम् आकलनपत्रकं परियोजनाकार्यञ्च – 6

**1. उचितसमयवाचकपदैः रिक्तस्थानपूर्तिं करोतु—**

(क) बालः ............ वादने क्रीडति। (5:00)

(ख) पिता प्रातः ........... वादने कार्यालयं गच्छति। (8:15)

(ग) मध्याह्ने ............... वादने विद्यालयस्य अवकाशः भवति। (4:30)

(घ) अहं रात्रौ .......... वादने शयनं करोमि। (10:00)

(ङ) शीतकाले सायं .......... वादने एव अन्धकारः प्रसृतः भवति। (5:45)

(च) ह्यः रात्रौ ............ वादने वृष्टिः अभवत्। (12:15)

(छ) अहं प्रतिदिनं ............ अल्पाहारं स्वीकरोमि। (10:15)

(ज) पिता सायं ..................... दूरदर्शनं पश्यति। (7:45)

**2. प्रदर्शितानां घटिकानां चित्राणि दृष्ट्वा समयं लिखत—**



................. ................. ................. .................

................. ................. ................. .................

................. ................. ................. .................

**3. विशेषण-विशेष्यपदानां मेलनं कुर्वन्तु—**

| **(क)** | **(ख)** |
|---|---|
| योग्यः | बालकः |
| धूर्तः | अध्यापिका |
| मधुराणि | जनः |
| उत्तमा | जलम् |
| कृष्णः | फलानि |
| शीतलम् | सर्पः |

**4. प्रदत्तानां समस्तपदानां समासविग्रहं कृत्वा समासस्य नाम अपि लिखत—**

| **समस्तपदानि** | **विग्रहवाक्यानि** | **समासनाम** |
|---|---|---|
| भिक्षाटनम् | .................... | .................... |
| शरीराङ्गानि | .................... | .................... |
| उद्यमसमः | .................... | .................... |
| दशरथसुतः | .................... | .................... |
| गुरुशिष्यौ | .................... | .................... |
| रामलक्ष्मणसीताः | .................... | .................... |
| पुत्रीपुत्रौ | .................... | .................... |
| सङ्ख्यागणना | .................... | .................... |

## कार्यकलापानां मूल्याङ्कनम्

अध्यापक: कार्यकलापस्य क्रियान्वयनानन्तरं मध्ये अन्ते वा कार्यकलापस्य अधिगमस्य परीक्षणार्थं मूल्याकनं कुर्यात्। एतदर्थम् अध्यापकाणां कृते अध: आरेखन् (रुब्रिक्स) प्रदत्तम् अस्ति। एतदद्वारा अध्यापकः छात्राणां अधिगमस्य प्रगतिं सुनिश्चितं करोति। छात्राणाम् अधिगमे न्यूनता अस्ति तर्हि तेभ्य: सहयोगः दद्यात् तथा च सम्यग् अधिगमं प्रदर्शयति चेत् प्रोत्साहनं दद्यात्। रूब्रिक्स इति आरेखे अध्यापक: उत्तमस्य कृते प्रोत्साहनम्, मध्यमस्य कृते अवधानम् तथा च सामान्यस्य कृते सहयोग: दद्यात्। एतत् दायित्वं अध्यापकस्य/अध्यापिकाया: अस्ति।

| कार्यकलाप: | कार्यकलापे सहभागित्वम् | | | कार्यकलापस्य अवबोध: | | | अवबोधस्य प्रयोग: | | |
|---|---|---|---|---|---|---|---|---|---|
| | उत्तम: | मध्यम: | सामान्य: | उत्तम: | मध्यम: | सामान्य: | उत्तम: | मध्यम: | सामान्य: |
| 1 | | | | | | | | | |
| 2 | | | | | | | | | |
| 3 | | | | | | | | | |
| 4 | | | | | | | | | |
| 5 | | | | | | | | | |
| 6 | | | | | | | | | |
| 7 | | | | | | | | | |
| 8 | | | | | | | | | |
| 9 | | | | | | | | | |
| 10 | | | | | | | | | |
| 11 | | | | | | | | | |
| 12 | | | | | | | | | |
| 13 | | | | | | | | | |
| 14 | | | | | | | | | |
| 15 | | | | | | | | | |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| 16 | | | | | | | | | |
| 17 | | | | | | | | | |
| 18 | | | | | | | | | |
| 19 | | | | | | | | | |
| 20 | | | | | | | | | |
| 21 | | | | | | | | | |
| 22 | | | | | | | | | |
| 23 | | | | | | | | | |
| 24 | | | | | | | | | |
| 25 | | | | | | | | | |

## परियोजनाकार्यम्

- भवन्तः/भवत्यः वार्षिकपरीक्षां लेखिष्यन्ति तन्निमित्तं स्वदिनचर्यां समयेन सह लिखत।
- प्रत्येकं समासस्य दश-उदाहरणानि लिखत।

## कार्यकलापानाम् अन्यत्र प्रयोगः

अस्मिन् सेतुपाठ्यक्रमे बालानां रुचिपूर्वकम् अवबोधार्थम् अनेके कार्यकलापः प्रयुक्ताः। एतेषां कार्यकलापानां प्रयोगः अन्येषां भाषिकबिन्दूनां बोधनेऽपि कर्तुं शक्यते। तद्यथा –

| कार्यकलापः | अत्र प्रयुक्तम् | अत्रापि प्रयोगः शक्यते |
|---|---|---|
| चार्टपत्रक-चिटिका-कार्यकलापः | शब्दरूपाणाम् अभ्यासः 1 (पुनरावृत्तिः) | धातुरूपाणि, उच्चारणस्थानानि, कर्तृ-क्रिया-बोधः, अनुवादकार्यम् |
| स्थानान्वेषणम् | शब्दरूपाणाम् अभ्यासः 2 (पुनरावृत्तिः) | धातुरूपाणि, प्रत्ययाः, उपपदविभक्तिः |
| चिटिकानां व्यवस्थीकरणम् | शब्दरूपाणि, सङ्ख्या | धातुरूपाणि, विशेषण-विशेष्यम्, पर्यायपद-विलोमपदबोधनम् |
| चिटिका-युगल-योजनम् | धातुरूपाणि 1, सन्धयः, कृत्-तद्धित-स्त्री-प्रत्ययाः | समासः, विशेषण-विशेष्यम्, पर्यायपद-विलोमपदबोधनम् |
| हस्तकन्दुकम् | धातुरूपाणि 2, | प्रत्ययाः, धातुरूपाणि |
| पदोच्चारणं वाक्यप्रयोगः च | अव्ययानि (स्थानबोधकानि) अव्ययानि (प्रश्नवाचकानि) | उपपदविभक्तिः, धातुरूपाणि |
| निर्देशानुसारं प्रयोगः परिवर्तनं वा | कारकाभ्यासः 1 कारकाभ्यासः 2 | धातुरूपाणि |
| रेलयान-निर्माणम्/पदाधारितं वाक्यनिर्माणम् | उपपदविभक्ति-अभ्यासः 1 उपपदविभक्ति-अभ्यासः 2 | शब्दरूपाणि, धातुरूपाणि |
| शब्दनिर्माणम् | उपसर्गाभ्यासः 1 उपसर्गाभ्यासः 2 | प्रत्ययाः |



विद्ययाऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING